मीमांसाशास्त्रसर्वस्वद्वितीयाध्यायः

४२५०

नं. ४२९०

मीमांसासर्वस्वद्वितीयाध्यायः

११०

भावा· श्रीगुरुदेवेनमः श्रीसिद्धेश्वर्यैनमः भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैषह्यर्थो विधीयते· एवं सिद्धे वेदप्रामाण्योपेतद्दलेन धर्मस्वरूपे च सिद्धे· कियंति धर्मस्वरूपाणीति
१ जिज्ञासायां शब्दांतरादिभिरियंतीति निर्णेतुं भेदलक्षणमारभ्यते· नहीदानीमन्यप्रमाणेसरः यतंतः शेषशेष्यादयः सर्वेकर्मभेदनिबंधनाः कार्येज्ञातेऽधिकारः स्यादुपदेशोऽति
देशाधीः· तत्र श्रेयःसाधनस्य धर्मत्वेपि तदेवश्रेयःसाधनत्वं कस्येति तावन्निर्णीयते· चित्रयायजेत पशुकाम इत्यादौ किं नामपदार्थस्य धात्वर्थस्य च फलभावनाकरणत्वमुता
न्यतरस्येति संशयः· उभयोरपि करणत्वेन एकरूपेण फलभावनारूपप्रधानसंबंधएवयुक्तः· उक्तं च· ऐकरूप्येण संबंधः प्रधानेन च सिद्ध्यति· तस्मात्फलपदेनैव सर्वसंबं
ध्यतेपदमिति· एवं भावनेत्युक्तः फलभावनाकरणत्वस्य फलभवनहेतुत्वपर्यवसायिनोऽपूर्वमंतरेणानिर्वाहादपूर्वमपि कल्प्यं· तथा च सर्वेषां तथात्वेऽनेकादृष्टकल्पनागौ
रवं· अन्योन्याघवादेकस्यैव फलभावनाकरणत्वं· उक्तं च· फलेनयस्य संबंधस्ततोपूर्वं प्रकल्प्यते· यदेकत्वोपपत्तौ च न युक्ता बहुकल्पनेति· तत्रापिनानियमेन फलसंबं
धः· एकस्मिन्वा क्वचित्तस्यैव कादाचित्कगुणप्रधानभावैरूप्यापत्तेः· उक्तं च· प्रधानं फलसंबंधितत्संबंधाद्गमिष्यते· प्रधानांगत्वमेकस्य न चैकत्राव कल्पतइति· १ ए
वं स्थिते· नामपदार्थस्यैव फलभावनाकरणत्वमुत धात्वर्थस्यैवेति संशये· तत्र नामार्थस्यैवेति युक्तं· फलं हि साध्यरूपं सिद्धरूपं साधनमपेक्षते· ननु साध्यांतरं· नामार्थश्च
सिद्धरूपत्वेन साधनत्वयोग्यो न धात्वर्थः· तस्य साध्यरूपत्वात्· तस्मान्नामार्थस्यैव फलभावनाकरणत्वं· उक्तं च· तत्र द्रव्यादिशब्दानां निष्पन्नार्थाभिधायिनां· करणार्थत्व
योग्यत्वात्साध्ये तिफलसंगतिरिति· एवं प्राप्तेभिधीयते· धात्वर्थस्यैव फलभावनाकरणत्वं· तथा हि· भावना तावत् विधिबलेन पुरुषार्थरूपभाव्यान्विता करणमपेक्ष
ते इति समभाव्यहोपात्तोपि धात्वर्थः साध्यांशात्प्रच्यावितः परश्च्युत्या करणांशे निविशते· परश्च्युत्या हि धात्वर्थस्य भावनासंबंधमात्रं प्रतीतं· न तु करणत्वं कर्मत्वं वा· यदुक्तं·
संबंधमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः· तदेकांशनिवेशे तु व्यापारोस्यान विद्यते इति· तत्र साध्यांतरसंबंधे धात्वर्थस्य योग्यत्वात्करणत्वमेव श्रुतिवशात्भवति· नामा
र्थस्य तु वाक्यीयं करणत्वं दुर्बलं· यागश्च स्वसाधननिष्पादितः सन्फलं साधयिष्यति· न हि शास्त्रप्रवृत्तेः प्राक्तन्निष्पत्तिः क्वचिदुपयुज्यते· तस्माद्धात्वर्थस्य फलभावना

राम
१

करणत्वमिति· यस्यचफलसाधनत्वंसधर्मइतितद्वेदस्यापवादस्यशब्दान्तरादिभिर्निरूपयिष्यमाणत्वोपोद्घातोयं· केचित्तुशास्त्रभेदमेवद्वितीयाध्यायार्थमाहुः· यथ
मेहिशास्त्रप्रामाण्येनिरूपितेतदेवशास्त्रंकुत्रभिन्नंकुत्रनेतिजिज्ञासासंभवति· नतुकर्मभेदगोचरेति· तन्न· शास्त्रभेदस्यानुष्ठानानौपयिकत्वेनाचिंत्यत्वात्· वस्तुप्रमा
णशेषशेषिभावाद्यनुपयोगाच्च· चोदनाप्रामाण्यबलेनसिद्धस्यचैत्यवंदनादिव्यावृत्तस्यधर्मस्वरूपस्यकुत्रभेदइतिजिज्ञासासंभवात्· शेषशेषित्वादिविचारोपयो
गाच्चभेदस्येतिदिक्· तदेवंसमानप्रत्ययोपात्तविधिबलाद्धात्वर्थस्यफलभावनाकरणत्वमितिस्थितं· कापुनर्भावनाकश्चविधिः उच्यते· करोत्यर्थात्मिकाउत्पा
दनापरपर्यायापरोत्पत्त्यनुकूलव्यापाररूपाभावना· साचाख्यातवाच्या· आख्यातार्थस्यकरोतिनाविवरणात्· उक्तंच· सिद्धकर्तृक्रियावाचिन्याख्यातगत्ययेमति·
सामानाधिकरण्येनकरोत्यर्थोवगम्यतइति· अयंभावः अभवतोगगनादेरक्रियमाणत्वात्भवतश्चघटादेःक्रियमाणत्वात्भवत्यर्थकर्तुः करोतिकर्मत्वं· तथाचकरो
त्यर्थकर्तुर्भवितृप्रयोजकतयाभवतेःप्रयोजकव्यापारेणिजुत्पद्यमानः करोत्यर्थमवलंबते· तेनसाभावना· आहच· करोतिः क्रियमाणेनकश्चित्कर्मणाविना· भव
त्यर्थस्यकर्ताचकरोतेःकर्मजायते· करोत्यर्थस्ययः कर्ताभवितुःसप्रयोजकः· भवितातमपेक्ष्याथप्रयोज्यत्वंप्रपद्यते· प्रयोज्यकर्तृकैकांतव्यापारप्रतिपादकाः एवंता
एवप्रयुज्यतेतत्प्रयोजककर्मसु· तेनभूतिषुकर्तृत्वंप्रतिपन्नस्यवस्तुनः· प्रयोजकक्रियामाहुर्भावनांभावनाविदइति· स्यादेतत्· भावनाधातुवाच्यैव· भोक्तव्यमित्यादावा
ख्यातंविनापितत्प्रतीतेः· तथाचतत्रापिकारकापेक्षादृश्यते· अस्तिचात्रापिकरोतिसामानाधिकरण्यं· किंकर्तव्यंभोक्तव्यं किंकृतवान्भुक्तवानिति· धातुत्वेनभावनावा
चकत्वविशेषेपि[illegible]त्वादिप्रातिस्विकरूपेणविक्लेदनादेशक्तेः· नचैवंपचतिविक्लित्त्योः सकर्मकत्वाकर्मकत्वविभागानुपपत्तिः· पचतीत्यस्यहिविक्लित्तिविशि
ष्टंकरोतीत्यर्थः· तेनविक्लित्त्यात्मफलव्यधिकरणस्यैवदेवदत्तादिनिष्ठस्यफलानुकूलव्यापारस्यपचिवाच्यतयापरसमवेतक्रियाफलशालित्वरूपंकर्मत्वंतंडु

भावा
२
2

लादीनां न विरुद्ध्यते· विक्लिद्यन्तीत्यत्र तु विक्लित्तिं कुर्वन्तीत्यर्थः· तेन फलसमानाधिकरणव्यापारवाचकतया क्रियाफलस्य परसमवेतत्वाभावात् क्लिदिरकर्मकः· एतेन घ
टो जायते घटं करो तीत्याद्यपि व्याख्यातं· जनेरुत्पत्त्याख्यफलसमानाधिकरणतदनुकूलव्यापारवाचित्वात्· करोतेस्तु फलव्यधिकरणव्यापारवाचित्वात्· उक्तं च·
अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना· अन्यत्राशेषभावात्तु तथा स्मान प्रकाशत इति· कर्तृत्वं च निष्पन्नावयवाभेदात् सूक्ष्मरूपेण वेत्यन्यदेतत्· अस्तु तत्त्वन्मत एवोक्त
विभागानुपपत्तिः· किं च· भावयति घटमितिवत् भवति घटमित्यपि प्रयुज्येत तुल्यार्थत्वात्· एकत्र हि कर्तुः कुम्भकारस्य व्यापारं णिजाचष्टे· अन्यत्र त्वाख्यातप्रत्यय इति·
ननु प्रयोजकव्यापारो णिजर्थः· कर्तृव्यापारस्त्वाख्यातार्थ इति भेद इति चेन्न· कारकचक्रप्रयोक्तुः कर्तृत्वे घटस्य तथात्वात्· यदि तु धातुनोक्तक्रियेति त्यं कारके कर्तृत्वेष्यते इ
ति वैयाकरणोक्तरीत्या प्राधान्येन धातूपात्तव्यापारवत्त्वं कर्तृत्वं तदापि संमतं कस्तर्हीदानीमाख्यातार्थः· व्यापारस्य धातुनैवाभिहितत्वात्· अपि च· ज्योतिष्टोमयाजीत्यादौ
धा तूपात्ता भावनां प्रति ज्योतिष्टोमयागरूपस्यांशान्तरस्य धातूपात्तस्यैव करणत्वे करणीयत्व इति णिनिः संगच्छते· न चैवं शायीतस्मास्थ्यमित्यादिप्रयोगापत्तिः· शयनस्य भाव्य
तयैवान्वयात्· तथैव व्युत्पत्तेः· त्वत्पक्षेपि साम्याच्च· एवं च क्रियावाचको धातुरिति व्याकरणस्मृतिर्नान्यथयितव्येति· उच्यते· प्रत्ययार्थः सह ब्रूतः प्रकृतिप्रत्ययौ सदा· प्राधा
न्याद्भावना तेन प्रत्ययार्थोऽवधार्यते· तथा क्रमवतोर्नित्यं प्रकृतिप्रत्यययोर्द्वयोः प्रत्ययश्रुतिवेलायां भावनावगम्यते· प्राधान्यबलेन· तदागमे हि तद्दृश्यत इति न्यायेन च
भावनायाः प्रत्ययार्थत्वं निश्चीयत इत्यर्थः· यत्तु रूढं तेष्वपि भावना प्रतीयत इति· तत्सत्यं· किन्तु धात्वर्थैरेव तदाक्षेपः· आह च· धात्वर्थकारकैरेव गुणभूतोवगम्यते· भावना राम
त्वारूढं तेषु तस्मान्नैवाभिधीयते· यत्रैव भावप्रधानत्वादाख्यातेन तत्संबन्धादेव गुणभूतकारकगतीति सिद्धेर्न कर्तृकर्मणोरभिधानं एवं कर्त्रोरभिधानादेव तदन्यथानु २
पपत्त्या वा धात्वर्थोऽभिधा रहा भावनालाभः· तथाभूतयैव च भावनया कारकसंबन्धोऽप्युपपद्यते· एतेन कर्तृनिसामानाधिकरण्यव्याख्यानेन चैवं धातोः सकर्मकाकर्मक

कत्वविभागानुपपत्तिः॰ अन्यदेव हि धात्वर्थप्राप्यं कर्म सकर्मके॰ अन्यदेव च सर्वत्र प्रत्ययार्थनिबंधनं॰ ओदनं पचति ग्रामं गच्छतीति धात्वर्थोपवर्गलभ्यमेकं कर्म॰ अपरं
पुनर्भावनाकर्म॰ न च कदाचित् धात्वर्थकर्मैव भावनाकर्मत्वमपि प्रतिपद्यते॰ पाकेनौदनं भावयतीति॰ कदाचित्तु नः स्वकर्मविशिष्टधात्वर्थयुक्ता भावनाकर्मांतरे
णा युज्यते॰ ग्रामगमनेन स्वर्गं भावयति ओदनपाकेन चेति॰ तच्च प्रायेण एवं कामशब्देन संबध्यते॰ सुखकामश्चासीत स्वाध्यायकामः शयीतेति॰ अत्र हि धात्वोरकर्मकत्वे
पि प्रत्ययार्थभावनां प्रति कर्मत्वेन सुखादीन्यवधार्यंते॰ आस्ते शेत इत्यादौ तु धात्वर्थ एव कर्मतया संबध्यते॰ तस्मात्॰ साक्षादव्यभिचारेण धात्वर्थोपयत्र कर्मभाक॰ सकर्म
कः स धातुः स्यात् पारंपर्ये त्वकर्मकः॰ आसनशयनादौ हि आनंतर्येण नियमेन वा कर्मविशेषो न निरूप्यत इत्यकर्मकत्वं॰ पचिगम्यादीनां तु विक्लिघत संयुज्यमानमात्रा
त्संबंधिकर्माव्यभिचारात्सकर्मकत्वं॰ ननु भावनाविशेषणत्वे कश्चिद्विशेषः॰ अस्मकवाल्वदुक्तरीत्याफलभावनयोः सामानाधिकरण्ये वैयधिकरण्याभ्यां विभागः॰ एते
न भवति घटमित्यादिप्रयोगापादनमपि प्रत्युक्तं॰ तत्र धात्वर्थसमानाधिकरणस्यैव व्यापारस्य व्युत्पत्तिबलात्प्रतीतेः॰ ज्योतिष्टोमयाजीत्यादौ तु धात्वर्थेनैव भावनाक्षेपादिति दि
क्॰ तस्मात्प्रत्ययवाच्यैव भावना॰ भावनाशब्दोप्यद्रविणकर्षेणतद्वाचकः॰ आह च॰ यादृशी भावनाख्याते धात्वर्थश्चापि यादृशः॰ नाम्नो नैव रूपेण कथ्यतेन्यैः पदैः क्वा
चिदिति॰ भावनाशब्दो हि निष्पन्नात्मिकां सत्त्वरूपापन्नां लिंगसंख्यायोगिनीमभिधत्ते॰ आख्यातं तु लिंगसंख्यारहितरूपेण॰ अत एवानन्याख्येयो भावार्थ इति सिद्धांतः॰
तदेवं भावना निरूपिता॰ विधिस्तु पुरुषप्रवर्तनात्मकः॰ शब्दनिष्ठप्रेरणाख्या॰ शब्दभावनेत्युच्यते॰ अभिधा॰ भावनेति च॰ सा च लिङादिवाच्या॰ आह च॰ अभिधाभावनामाहु
रन्यामेव लिङादयः॰ अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते इति॰ तस्याश्चांशत्रयमुक्तमभियुक्तैः॰ लिङोभिधा सैव च शब्दभावना भाव्यं च तस्याः पुरुषप्रवृत्तिः॰ सं
बंधबोधः करणं च तस्याः प्ररोचना चांगतयोपयुज्यत इति। कथमप्रसिद्धायां तस्यां शक्तिग्रह इति चेत्॰ उच्यते॰ शब्दश्रवणानंतरं प्रवृत्तिमुपलभ्य तद्धेतुभूतगवेषणाद्येषणा।

भा·वा· दियापारात्तु वृत्तप्रवर्तनासामान्ये शक्तिग्रहः· अपौरुषेये तु वेदे पुरुषधर्मस्येच्छादेरसंभवात् व्यतिरिक्तस्य विशेषस्यातर्कितस्य लक्षणया लिङादिर्बोधकः· तदाहुः·
३ अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि· तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया· न्यायप्रत्युत्पादनार्थं वा प्रपंचार्थमथापि वा· विध्यादीनामुपादानं चतुर्णामादितः कृ
तमिति· कृत्यानां तु प्रैषवाचित्वेपि प्राप्तविषयप्रवर्तनात्वरूपप्रैषत्वस्य वेदेऽसंभवात् प्राप्तविषयत्वास्य विशेषणत्यागेन लक्षणया विशेषपरत्वमेव· तदाहुः· प्र
3 वर्तनस्मृतिः प्राप्ते प्रैषइत्यभिधीयते· अप्राप्तप्रैषणं सर्वविधिलिंगतिपद्यत इति· सा च शक्तिशक्तिमतोरभेदात् शब्दात्मिकेत्युच्यते· सा च यद्यपि समानगत्यपोपा
रयात्स्यभावनैय सह विशेषणतया संबध्यते तथापि दर्शपूर्णहोमीत्यादौ तात्पर्यतो गुणांशे पर्यवस्यति· श्रेयःसाधनतानु लिङादेः प्रवर्तकत्वानुपपत्तिलभ्येति
आचार्याः· सैव लिङादिवाच्येति तु मंडनप्रभृतयः २ चोदना पुनरारंभः· अपूर्वसिद्ध्यर्थत्वात् ज्ञनकं किमिति चिंतितं· अपूर्वमेव तु निष्प्रमाणकमिति पूर्वपक्षः·
सिद्धांतस्तु· फलाय विहितं कर्म क्षणिकं चिरभाविने· तत्सिद्धिर्नान्यथेत्येवमपूर्वमपि गम्यते· कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा· योग्यता शास्त्रगम्या या प
रा साऽपूर्वमिष्यते· श्रुतार्थापत्तिरेवैका प्रमाणं तस्य चेष्यते· शब्दैकदेशभावाच्चाश्रुतार्थेऽप्यागम एव नः· यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति· सूक्ष्मशक्त्यात्म
कं वा तत्फलमेवोपजायते· एषात्र प्रक्रिया· यागेन स्वर्गं कुर्यादिति प्रथमं बोधः· कथं विनश्वरेण फलं कर्तव्यमित्यपेक्षायामपूर्वं कृत्वेति· कथमपूर्वं क्रियत इत्यपे
क्षायामंगानुष्ठानेनेति· ततः पूर्वापरकालीनैरंगैरुपकृतस्य यागस्य फलापूर्वसाधनत्वं साक्षात्तन्न संभवतीत्युत्पत्त्यपूर्वं कल्प्यते· तत्र संनिपत्योपकारकांगापू राम
र्वाणि यागस्यैव शरीरातिशयमादधानानि तदुत्पत्त्यपूर्वनिष्पत्तौ व्याप्रियंते· आरादुपकारकाणि तु तदुत्पत्त्यपूर्वस्य फलापूर्वनिष्पत्तौ· दर्शपूर्णमासयोस्तु पक्षा ·३
द्यवर्तिभ्यां समुदायाभ्यां युगपत्फलापूर्वारंभायोगात्प्रतिसमुदायमेकैकमपूर्वं कल्प्यते· तत्कार्यभावापेक्षायामग्न्याधानादिगोपदेशः· ततः पूर्वोत्तरांगस

हितेभ्यः साक्षात्तद्धेतुत्वस्य योगात्तु प्रतिज्ञिकं त्रीणि त्रीण्यपूर्वाणि कल्प्यन्ते · इति नवापूर्वीपक्षः सिद्धान्तसंमतः ३ तानि द्वैधं गुणप्रधानभूतानि · अस्त्यान्तभेदादपूर्व-
भेद इति स्थितं · तदपवादत्वेनेदमधिकरणमारभ्यते · दर्शपूर्णमासयोः श्रूयते व्रीहीनवहन्तीति · तत्र किमवघातादपूर्वमस्ति उत नेति संशयः · तत्र आख्यातत्वावि-
शेषेणाभूतेर्भव्यार्थजन्मनः सिद्धेश्च साध्यताशक्तेः सर्वाख्यातप्रधानता · तस्माद्व्रीह्यपेक्षयाऽवघातः प्रधानं ततश्चापूर्वमिति प्राप्ते ब्रूमः · नामाख्यातार्थसंबंधे पदश्रुत-
प्रयोजनं · तस्माद्दृष्टार्थतायुक्ता नेतरस्याप्रमाणिका · स्यादेवं · यद्यदृष्टं कल्प्येत · इह तु श्रुतमेव व्रीहीणां यागनिर्वृत्तिरूपं प्रयोजनं · अवघातस्य च व्रीह्यर्थत्वे तुषविमो-
कादि दृष्टमेवेति नादृष्टं कल्प्यं · यत्तु नियमापूर्वं तत्क्रियाकृतं न भवतीति न तयाऽपदिश्यते · किंच · अवघातस्यादृष्टार्थत्वपक्षेऽपि द्रव्यनियमात् कल्प्यमेव तदिति वरं
दृष्टार्थावघातनियमादेकमेव तत्र कल्पितं · तेन यत्र द्रव्यं प्रति क्रियाणां प्राधान्यं तत्रैवापूर्वभेदः · अस्य च विवेकार्थं गुणत्वप्रधानत्वलक्षणं तन्त्रीयसिद्धमेवासिद्धव-
त्कृत्य दृष्टार्थत्वालाभादेव परिचायकतामाह सूत्रकारः · यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् · यैः कर्मभिः द्रव्यं धर्मतः स्वरूपतो वा न सं-
स्कर्तुमिष्यते · तानि प्रयाजादीनि · स्वसाधनं प्रति प्रधानभूतत्वाददृष्टार्थानीत्यर्थः · यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् · यैरवघा-
तादिभिः द्रव्यं व्रीह्यादि · चिकीर्ष्यत इति उत्पाद्यते विक्रियते आप्यते संस्क्रियते वेत्यर्थः · प्रयोजनं तु द्वैधं गवेपि च रावति देशप्राप्ते व्रीहिसाधनकोऽवघा-
तः पूर्वपक्षे · कुतः · प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकं · प्रयाजेष्वाज्यवत् तेन हन्तेरस्याङ्गीह्यबाधनं · सिद्धान्ते तु बाध्यते · कुतः · प्रधानोपयिकं द्रव्यं संस्कारै-
रपि युज्यते · तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः प्रियङ्गवः ४ धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् · यद्यपि पूर्वाधिकरणे द्रव्यचिकीर्षा गुणकर्मलक्षणतयानोक्ता ·
उपकारकत्वलक्षणा शेषत्वप्रसङ्गात् · तादर्थ्यलक्षणं हि श्रुत्यादिप्रमाणकं शेषत्वं · ननु प्रत्यक्षस्योपकारानभिज्ञमिति वक्ष्यमाणत्वात् · किंतु अन्यतः सिद्धशेषाणां

भाव॰
४
5

येषां दृष्टोपकारिता। तेषां नापूर्वमस्तीति हंत्यादीनामुदाहृतिः। तथापि तद्देवगुणकर्मलक्षणमिति मत्वा तत्पत्यवतिष्ठमानस्य भ्रमनिरासार्थमिदमधिकरणं। स्रुचः
संमार्ष्टीत्यादिषु चिंत्यते। संमार्गादयः प्रधानकर्माणि न गुणकर्माणीति। तत्र दृष्टप्रयोजनाभावान्न गुणकर्म। न च द्वितीययास्य स्रुचां साध्यत्वं। सक्तून्जुहोतीत्यादौ व्यभिचारात्। अ
तः स्रुगादिसाधनकसंमार्गविधानात्प्राधानकर्मैवेति प्राप्ते ब्रूमः। सत्त्वासाध्याभिधायित्वं द्वितीयायाः प्रतीयते। कर्तुर्यदीप्सितं यच्च तथायुक्तमनीप्सितं। तत्कर्मेति
द्वितीयार्थ इत्येवं पाणिनिस्मृतिः। बलीयसी च साचारात्प्रयोगस्थात्तिता दृशः। ईप्सितानीप्सितानुवर्तिसाध्यरूपं कर्म। तच्च द्वितीयार्थ इति व्याकरणादवगतं। समभि
व्याहारपेक्षायां च भावनायां करणसाधनत्वेन समीहिताः स्रुच एव द्वितीयाबलात्साध्यत्वेन संबध्यंते। सक्तूनां तु भूतभाव्युपयोगाभावेन भाव्यत्वान्वयायोगात्साधन
त्वं द्वितीयया लक्ष्यते। आह च। भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते। सक्तवो नोपयोक्ष्यंते नोपयुक्ताश्च ते क्वचित्। प्राधान्यमेव तत्रापि द्वितीया वदति स्वतः। विरोधा
त्तेन संबंधी गुणभावस्तु कल्प्यत इति। प्रयोजनं तु पूर्वपक्षे प्रकृतौ स्रुक्संमार्गस्य बहुसाधनकत्वात् कपिंजलन्यायेन त्रित्वस्य शास्त्रीयत्वात्पात्रविवृद्धावपि पशु
चातुर्मास्येषु तिस्र एव संमार्ष्टव्याः। सिद्धांते तु सर्वाः। इति प्रधानसंस्कारावृत्तेः ५ एतच्छास्त्रप्रयोक्तृसंस्कारे या ज्यावद्देवताभिधानत्वात्। स्तोत्रशस्त्राण्युदाहरणं। स्तु
तिरेव स्तोत्रं। शस्त्रमपि सैवाप्रगीतमंत्रसाध्या। गुणगुणिसंबंधकीर्तनं स्तुतिः। सा च गुणगुणिभ्यां निर्वर्त्यते। तत्र गुणानामकर्मगतया निष्प्रयोजनत्वात् स्तुत्यर्थत्व
मसंदिग्धं। स्तुतिस्तु स्तुत्या देवताः प्रति किं स्मारकत्वेन गुणभूता किं वा देवतां प्रति प्रधानभूता सत्यदृष्टार्थेति संशयः। तत्र। देवतास्मरणदृष्टमुद्दिश्यत्वाद् दृष्टकल्पन
प्रयुक्तं। तेन तादर्थ्यात्स्तोत्रादेर्गुणकर्मता। इति प्राप्ते उच्यते। सत्यं दृष्टार्थता युक्ता स्तुतिश्चेन्न विरुध्यते। देवतास्मरणार्थत्वे स्तुतिरूपं विहन्यते। स्तुतस्य हि प्रयोजन एम
कल्पनं स्तुतिश्चेह कर्तव्यतया श्रूयते। आज्यैः स्तुवते प्रउगं शंसतीति। यदि च मंत्रवाक्यं गुणसंबंधाभिधानपरं तदा स्तुतिर्भवति। यदा तु गुणद्वारेण गुणिप्रकाशना ४

र्थं · न तदास्कन्दति · न हि लोके योऽयं वक्ता केशांस्तत्समानयेति परिचायकत्वं न गुणो गौणौ स्तौतीति व्यवहरन्ति · तस्मात्स्तौतिशंसत्योः प्रकाशनलक्षणायां मानाभावात्
श्रुतिबलाददृष्टार्थत्वं · एवं च माहेन्द्रग्रहसंनिधावैन्द्री श्रुतिरुपपद्यते · तथा हि · यां कांचिदप्युपादाय देवतां साधिता श्रुतिः · अदृष्टं यागमात्रार्थं करोत्याराद्वशक्तितः ·
त्वत्पक्षे तु यज्ञे इन्द्रस्तवैन्द्री श्रुतिरुत्कृष्येत · श्रुतिसमवायित्वाद्देवतायाः · यदि तु मनोतास्वाग्निश्रुतिर्द्व्यग्नीषोमाविवेदृशस्तु एव महेन्द्रं लक्षयेत्तर्हि लक्षणैव दोषः · ६
विधिमंत्रयोरैकार्थ्यमेकश्च स्यात् · द्विविधमाख्यातमुक्तं · प्रधानकर्मणो विधायकं गुणकर्मणश्च · किमेतद्देवप्रकारद्वयमुतान्योप्यस्तीति संशये तृतीयोप्यस्तीति प्र
संगात्प्रतिपाद्यते · तत्र देवा श्वायाभिर्यजते ददातीत्येवमादीनि यच्छब्दामंत्रणोत्तमपुरुषादिसंयुक्तान्याख्यातानि · यत्सोम यहविर्यजति माछेदि त्यादीनि च निमित्तादिप्रतिपाद
केनाख्यातान्तरैरेकवाक्यतां गतान्युदाहरणं · तानि च प्रायेण मंत्रेष्वेवेति मंत्रोपन्यासः · अविधायका मंत्रा इति प्रसिद्धिश्च · ननु मंत्रत्वस्य कश्चिन्न्यायोपयोगः · तानि विधा
यकानि न वेति संशये · तत्र · विधायकत्वमेतेषामाख्यातत्वाविशेषात् · सत्यपि प्रकृते कर्मण्यप्राप्तांशकर्मभेदधीः · प्राप्तत्वाद्यदि चेष्यते मंत्राणामनुवादिता तैरेव विहितं क
स्मात्तन्न स्मारयति चोदना · यत्तु · मंत्रत्वादविधायक इति · तन्न · वसंताय कपिंजलानालभत इत्यादौ व्यभिचारात् · तस्माद्गृह्यमाणविशेषत्वात्तद्ब्राह्मणवन्मंत्रोपि विधायकः ·
अप्राप्तश्च कर्मभेद इति प्राप्ते निधीयते · यच्छब्दादिभिरेतेषां विधिशक्तिर्विहन्यते · न हि यागैर्यजेतेनिकथंचिद्विधिसंभवः · तथा ह्यग्निं ग्रहणामीति नात्मनः त्वां विधातुं शक्यः ·
तथा अग्नीदग्नीन्विहरेत्याद्यावामंत्रणेन विधिशक्तिलोपः · अभिमुखस्यानभिमुखपुरुषसाधारणत्वाद्विधेः · आमंत्रणस्य च तद्धि रूढस्वभावत्वात् · तस्मादेवमादीनां प्रयोग
मध्ये पुरुषीतरेणासारयितव्ये सामर्थ्यं · न तु विधावितिसिद्धमविधायकत्वं · आह च · अनुष्ठाने पदार्थानामवश्यंभाविनी स्मृतिः · अनन्यसाधनानन्यकार्यैर्मंत्रैः प्रसाध्य
ते · एवं च मंत्रैरेव स्मर्तव्या कर्तव्यमिति नियमादृष्टमपि कल्प्यं · यत्र तु मंत्राभावस्तत्र ब्राह्मणमेव विधायकं स्मारकं च · तदुक्तं · विधायकं सदप्यर्थं ब्राह्मणं स्मारकं तथापि

भा·वा ·मंत्रनामकविरोधे स्यादित्यत्रैतद्धेष्यतीति· ७ तच्चोदकेषु मंत्राख्या· न्यायानौपपत्तिकेनापि मंत्रशब्देन पूर्वव्यवहृतमिति तत्प्रसंगात्मंत्रलक्षणमुच्यते· तत्र पूर्वोक्त
५ ममिधानं· चोदकं प्रयोजकं येषां· तेषु मंत्राख्येति· प्रायिकमिदं· यत्राभियुक्तानां मंत्रत्वप्रसिद्धिः स मंत्र इति विवक्षितं· प्रयोजनं तु अहे बुध्निय मंत्रं मे गोपाय· यमृष
यस्त्रयीविदाविदुः ऋचः सामानि यजूंषि इति वेदवाक्यार्थबोधः ८ शेषे ब्राह्मणशब्दः· मंत्रातिरिक्तं ब्राह्मणमिति· एतदपि प्रासंगिकं· फलं तु एतद्ब्राह्मणान्ये
5 वपंच हवींषि इति वाक्यार्थबोधः ९ अनाम्नातेष्वमंत्रत्वमाम्नातेषु हि विभागः स्यात् ऊहप्रवरनामधेयानां मंत्रत्वमुत नेति संशये मंत्रैकवाक्यत्वेन तन्मध्ये नि
वेशान्मंत्रकार्यकरत्वाच्च मंत्रत्वमिति प्राप्ते उच्यते· अभियुक्तप्रसिद्ध्या हि मंत्रत्वमवकल्प्यते· स्वाध्यायकाले तेषां च समाम्नातेषु मंत्रधीः· तस्मादभियुक्तप्रसिद्ध्यभावाद
मंत्रत्वं· मंत्रैकवाक्यत्वं प्रयोजकं· मंत्रकार्यकारित्वं तु रथघोषेण माहेन्द्रं स्तोत्रमुपाकरोतीति विहिते रथघोषे व्यभिचारि· प्रयोजनं तु ऊह्यमाने सूर्यायेत्यादिपदे अन्यत्रेष्टेपि मंत्र
त्वेषा निमित्तप्रायश्चित्तविरहः· तत्पूर्वोत्तरपदेषु मंत्रत्वमस्त्येव· यतः आकृतीनामभिव्यक्तिर्याकथंचिन्निरूपिता· नासाववयवाधिक्याद्विनाशोपि विनश्यति· तेन तत्र
छोदसप्रयोगादिकमप्युपपद्यत इति सिद्धं १० तेषामृग्यत्रार्थवशेन पादव्यवस्था· अहे बुध्नियेत्यादिपूर्वोदाहृतावाक्यार्थोपयोगी मंत्राणामवान्तरविभागः अगा
दिरूपः लक्षणेन व्युत्पाद्यते· यत्र पादव्यवस्था सा ऋगिति· व्यवस्था च यद्यपि छन्दोलक्षणाधीना तथापि क्वचिदर्थोपि पादेन समाप्यत इति प्रायिकं तत्सूत्रेऽनूदि
तं· न तु लक्षणघटकं ११ गीतिषु सामाख्या· प्रगीतो मंत्रः सामेति सूत्रार्थः· तत्रापि नागृहीतविशेषणान्यायेन रथंतरं गायतीत्यतिदेशोपपत्ते गीतिरेव सा राम
मेति स एव लक्ष्यते· इह तु विभागमात्रं विवक्षितं इति· ऋक्वतीषु न पौरुक्त्यं १२ शेषे यजुःशब्दः ऋक्सामाभ्यां भिन्नं मंत्रजातं यजुरित्यर्थः· १३
निगदो वा चतुर्थं स्याद्धर्मविशेषात्· शेषे यजुःशब्द इत्यस्यापवादोयमारभ्यते· परसंबोधनरूपाः प्रोक्षणीरासादयेत्येवरूपा मंत्रा निगदाः· ते किं यजूंषि उत। ५

भिन्ना इति संशयः· व्यपदेशभेदादुपांशु यजुषा उच्चैर्निगदेनेति रूढधर्माध्यासाच्च भिन्ना इति प्राप्ते उच्यते· नितरां गद्यत इति व्युत्पत्त्या यजुष्वेव उच्चैस्त्वधर्मयोगान्नि
गदव्यपदेशो ब्राह्मणपरिज्ञानकवृद्ध्युपपद्यते· विरुद्धधर्मोपि सत्येव यजुष्टे परप्रत्यायनरूपकार्यविरोधेन निगदेषूपांशुत्वाप्राप्तेरर्थवशाच्चोच्चैस्त्वमिहेन
यजुर्भ्यो भेदमावहति· तस्मात् यजुर्लक्षणयोगाद्यजूंष्येव निगदाः· चान्नेपेक्षपवादेषु प्राप्तालक्षणाकर्मणि· प्रयोजनं नवक्लृप्यं पत्वरूपत्वात्प्रवर्तते· १४ अर्थै
कत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्· विधेयमंत्रादित्युक्तं· तत्र ऋक्सामानां भेदेन वक्तव्याः· अधोत्वगसिद्धत्वात्· यजुषां तु प्रश्लिष्टपठितत्वात् न लक्ष
णाद्विभागभेदज्ञानमिति लक्षणमुच्यते· यावदेकप्रयोजनं न विभागे च साकांक्षं पदजातं वा यागसाधनत्वात् यजुः· वक्तव्यत्वाच्च वाक्यं· अन्यत्तु यजुरंतरं वा
क्यांतरं चेत्यर्थादुक्तं· उदाहरणं तु देवस्य त्वा सवितुः प्रसव इति· अत्र हि सर्वाण्यपि पदानि निर्वापप्रकाशनार्थानि विभागे च साकांक्षाणि· यद्यपि भगो वा विभज
तु अर्यमा वा विभजतु पूषा वा विभजत्विति सर्वे एकार्थाः· विभागप्रकाशकत्वात् तथापि न साकांक्षा इति भिन्नवाक्यत्वं· अत एव विभागे विकल्पाः· तथा स्योनं
ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि· तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति यद्यपि विभागे साकांक्षं तथापि प्रयोजनभेदा
न्नैकं वाक्यं· किंतु द्वे· तत्र पूर्वं सदनकरणे विनियुज्यते· परं पुरोडाशप्रतिष्ठापने· १५ समेषु वाक्यभेदः स्यात्।येषामदृश्यमानकर्मसमवेतार्थत्वेन लैंगिको वि
नियोगाभावाद्वाचनिको विनियोगः· परस्परनैराकांक्ष्यं च स्वरूपतोवगम्यते तत्र किं प्रत्येकं यजुरिति चिंत्यते· किं वाकदृष्टार्थमंत्रावधेरेकमंत्रत्वं उत यावदेव
मिथः संबद्धं इषे त्वेति आयुर्यज्ञेन कल्पतामिति च तावदेकं यजुः· ऊर्जे त्वेति प्राणो यज्ञेन कल्पतामिति च यजुरंतरमिति तत्र· अदृष्टार्थत्वमेतेषामनुष्ठेया
प्रकाशनात्· न चैकं तत्र साकांक्षाः सर्वइत्येकवाक्यता· अदृष्टं हि लाघवादेकमेव कल्प्यं· तत्र च संभूयाकारित्वाद्धि मन्यमानाः साकांक्षा एवेत्येकवाक्या

भा·वा ६ 6

नाप्यग्निप्रतीकभेदेनानेकत्र विनियोगः इषेत्वेति शाखां छिनत्ति ऊर्जे त्वेत्यनुमार्ष्टीति· तथापि भावद्विनियोगं सकलमावर्तयिष्यते· आदिप्रतीकेन मध्यप्र
तीकेन च सर्वस्यो मन्त्रविनियोगादिति प्राप्ते ब्रूमः· यद्यप्येषामदृष्टोर्थस्तथापि न तदेकता· रूपतो हि तिरस्काराभिन्नत्वेनावधारिता· अन्योन्याना
दृष्टो वार्थ यं ते प्रयोजनं· यथापेक्षमतस्तेषां भिन्नाद्दृष्टकल्पना· यथा विश्वजिदादीनां भेदेन फलकल्पना· यथा च समिदादीनामपूर्वं भिन्नमिष्य
ते· तद्वदत्र न चात्रैषामदृष्टार्थत्वसंभवः· छेदनादिप्रकाशेन दृष्टार्था हि विधेरमी तेन विधिवशादेषां प्रकाशनार्थत्वे छिनत्त्यागत्या छिनत्तीत्याद्य
ध्याहार्यं· तत्रैकेन छेदनं प्रकाश्यते अन्येनानुमार्जनमित्यर्थभेदान्मंत्रभेदः· तथा आयुर्यज्ञेन कल्पतामित्यादीनामपि स्वरूपतो निराकांक्षत्वात् क्लृ
प्तीर्वाचयतीति च वद्धक्लृप्तिवाचनस्य चोदितत्वात्तत्संपत्त्यर्थमायुरादिविशिष्टक्लृप्तिभेदप्रकाशनपरत्वादर्थभेदे मंत्रभेदः· एतेन निर्वापवत्त्विभागवहास्त्र
भेदो विकल्पश्च प्रत्युक्तः॥ १६ ॥ अनुषंगो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात्· या ते अग्ने याशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अ
पावधीं स्वाहा· या ते अग्ने रजाशया· या ते अग्ने हराशया· इति श्रूयते· तत्रोत्तरयोर्मंत्रयोरुदाहरणं· किमनयोर्लौकिकः शेषोऽध्याहार्यः किं वा तनूर्वर्षि
ष्ठेत्याद्यनुषंक्तव्यमिति· तत्र· एकवचैतन्निबद्धो हि समाम्नायेन वैदिकः शेषोऽन्यत्रनन्नेतयोर्लौकिकस्यातिबंधनः· लौकिको हि शब्दो यत्र कार्यं तत्र नि
युज्यमानो न विरुध्यते· वैदिकस्तु यदर्थमाम्नातस्तेनैव निबद्धो नान्यत्र नेतुं शक्यः· यदि तु रचयितव्यो लौकिका इच्छितत्वेन लघुतर मिति वैदिकमध्य
त्र नीयेत तथापि समाम्नायबहिर्भावात् लौकिकमेव स्यात्· तथा हि· ता नेव वैदिकान् मंत्रान् भारतादिनिवेशितान् स्वाध्यायनियमं हित्वा लोकव्यु
ह्यायां प्रयुंजते· तस्माद्वैदिकः शेष इति प्राप्ते· निरवध्महे विमुक्तव्याप्ततो वेदे लौकिकावसरच्छित्तिः· तद्यथा पारविमोकश्च सकलान्वेषणान्वये· त राम ६

त्र· अदृष्टः प्रकृतार्थः प्रत्ययेनाक्षिप्यते ततः· यदेतस्मिन्नलब्धकमार्थनीयः पदांतरे· तस्मिन्वाक्ये पि नस्याच्चेत् मृग्यो वाक्यांतरे ततः· वाक्यांतरे पि नस्याच्चेत्

मृग्यः प्रकरणांतरे· सर्वत्र च· संनिकृष्टेन लब्धत्वे हि प्रकृष्टोपि वैदिकः· सएवावैदिकात्कस्मात् आम्नः संनिहितो यदा· तदिहत्याशयाहृताशयावाक्ययोः

शेषः स्वपदत्त्ववाक्ययोरलब्धत्वात् वाक्यांतरेऽत्वाक्षिप्यते ततश्च· यथापेक्षितरूपे हि वाक्यशेषे समर्पिते· वेदेन लौकिकः शेषो न मृग्यो निष्प्रमाणकः· सर्वार्थो

पायं मन्त्राम्नायमानः सर्वेषामीप्सिते देशे नाम्नातुं शक्यतइति एकस्य यथाक्रममाम्नातः इतरेषामथाकांक्षितः पूर्वत्र परस्तादित्येवं तावादृष्टमाम अर्थः परस्ता

देवनिवेश्यते· आह च· प्रतीतिमात्रलाभार्थं तत्र देशे समाप्यते· योग्यत्वात्संनिवेशस्तु पूर्वमंत्रवदिष्यते· १७ चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा

सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति श्रूयते· अच्छिद्रेणेत्यादिः शेषः किं पूर्वयोरप्यनुषज्यते उत नेति संशयः· तत्र· अनंतरेण संबध्यशे

षस्योपकृतार्थता· शेषिणश्च निराकांक्षाः किंनिमित्तानुषंगधीरिति प्राप्ते ब्रूमः· अनंतरस्य वाक्यस्य यदि शेषो भवेदयं· ततएवं भवेदेषत्वात्पूर्वातार्थेन सर्व

साकांक्षपुनातुशब्देकवाक्यतामुपगतो ह्ययमच्छिद्रादिकरणद्वारेण यजमानपावनक्रियाप्रकाशनार्थः सैव च क्रिया पूर्वाभ्यामपि मंत्राभ्यां प्रकाश्यते· तदर्थ्ये

चवाक्यशेषः प्रधानवशात्तत्राकृष्यत इत्यनुषंगसिद्धिः· १८ अवयवानानुषज्येत· प्रत्युदाहरणत्वेन संनिधेरिदमुच्यते· असंबद्धतिरोधाने वैषम्यान्नानुष

ज्यते· संतेवायुर्वातेन गच्छतां संयजत्रैरंगानि संयजपतिराशिषेत्यत्र गच्छतामिति शब्दः संयजत्रैरित्यनेन बहुवचनांतेन अयोग्यत्वान्न संबध्यते· अतो बुद्धि

विपरिवृत्तिर्भंगाय यजपतिना सह योग्यत्वेपि नानुषज्यते· अतो वैदिकशेषासंभवान् गच्छतां गच्छतामिति वाध्याहारः· अनुसंधानमात्रमिति केचित्· प्रयोज

नं तु अनुषंगे मंत्रत्वाम्नायपक्षे तं· लौकिके त्वमंत्रत्वमिति· आह च· आम्नायमानं ह्यनुषज्यमानं अनुगतं मंत्रनिरूपणायां ऊहादिसाम्येन तु लौकिकानाम्

भा·वा· मंत्ररूपप्रतिपत्तिसिद्धिरिति ॥ १९ ॥ इति श्रीमीमांसाशास्त्रसर्वस्वे द्वितीयस्याध्यायस्य प्रथमः पादः ॥ ॥ शब्दांतरे कर्मभेदः कृतानुबंधत्वात् ॥ उपोद्घा-
७ तप्रसक्तानुप्रसक्तादौ गतेऽधुना · शब्दांतरादिभिर्भेदो लक्षणार्थो निधीयते · तत्र शब्दांतरसहकृतोत्पत्तिविधिगम्याणको भेदस्तावन्निरूप्यते · ज्योतिष्टोमेन
श्रूयते · सोमेन यजेत दाक्षिणानि जुहोति · हिरण्यमात्रेयाय ददाति · स्त्रणानि स्तोति शंसतीत्यादि · तत्र किं स्वर्गकामो यजेतेत्यनेन वाक्येन विहितायां भावना-
यामवच्छेदकत्वेन सर्वे धात्वर्था विधीयंते उत प्रतिधात्वर्थं भावनाभेद इति संशयः · तत्र · भिन्नासु भावनासु सत्यां हनेकापूर्वकल्पनं · एकत्वे तूपपन्नेऽर्थे नानेक-
त्वकल्प्यते · किंच · भावनायास्तात्पर्यार्थत्वान्न रेकत्वान्न भिद्यते · गुणभूता हि धात्वर्था नानात्वं भिद्युः कथं च न · फलापवर्गित्वात् क्रियाणां फलभेदं विना भेदायोगात्
भावनाभेदवादिपक्षे भाव्यमपूर्वमपि भिद्येत · तथा च गौरवं · यदि च धात्वर्थो न्यतिगुणभूता भावना स्यात् तदा नानात्वमुपादीयमाना भिद्येतापि · न त्वेतदस्ति · १
आख्यातस्य क्रियाप्रधानत्वात् · अतः सह तत्पैव धात्वर्थास्तां विशिंषंति · प्रातिपदिकार्था इव सुबर्थं · आरुणैकहायन्यैकयेत्येवं शास्त्रैर्निधीयते · प्रकृति
प्रत्यययोः पौर्वापर्यनियमात् तत्तत्प्रकृतिपरप्रत्ययेन निरपेक्षतत्तत्प्रकृत्यर्थानुरक्तभावना गतीति स्वच्छेदकांतरस्याकांक्षाभावेन धात्वर्थांतरविधाना-
योगात् धात्वर्थभेदेन भावनाभेद इति · तथा चापर्यायभूतधातुरूपशब्दांतरबलेन सर्वेषामन्यानन्तहात्वर्थावच्छिन्नभावनारूपकर्मत्तापकत्वरूपोत्पत्तिवि-
विधित्वावगमात् कर्मैकोच तदनुपपन्नेः शब्दांतरस्योत्पत्तिविधित्वज्ञापनेन कर्मभेदोपयोगः · उक्तं च · धात्वर्थभेदे सर्वत्र विहितेयं भावनांतरं तु त्यस्येका
तु रक्ता हि नान्येनादातुरज्यते · दृष्टांतस्तु विषमः · तथा हि · निष्पद्यते समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ततः सर्वविशिष्टास्या दृष्टोत्पन्नसुबर्थवत् · यदि वा राम
प्रत्ययः शुद्धः सर्वधातुष्वशक्तिः श्रूयेतकयवत्सर्वैर्विशेष्येत स धातुभिः । अग्नीषोमादिर्हि पदस्तुत्या सुबर्थेन संबध्यते आरुणादिस्त्वेकयेणसह ७

वाक्यात्· तत्र एकेन प्रमाणेन युगपदुभयबंधः· इह तु श्रुत्या यागसंबद्धायां भावनायां यागादानग्रहीतौ वाक्यप्रकरणाभ्यां निविशेयातां· तेन च श्रुतितो दुर्बलत्वेन
नुद्दानीतिपदेपि भावनाश्रवणात्स्तुतिरेवेति चेन्न· यागानुरक्तैवेयमपि त्वत्र श्रुतिव्यापारविरहात्· करणांशोपनिपाताच्चास्ति विरोधः समुच्चये चैतेरपेक्ष्य
बाधः· तस्मात् धात्वर्थभेदात् भावनाभेद इति सिद्धं १ एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात्· समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति
स्वाहाकारं यजतीति श्रूयते· तत्र किमेकं कर्म उत पंचेति संशयः· एकमिति प्राप्तं· तथा हि· गत्यपार्थः समानोपि धातुभेदेनाभिधाने· धातोरपि समानत्वेनैकेन भे
दोवधार्यतां· न चैवमेकेनैव विधानेवाक्यांतरानर्थक्यं· तत्वमसीतिवक्तत्वोम्या सव[illegible]स्यात्· तनूनपादादिदेवताविधानार्थत्वाद्वा· शाखांतरीया
ग्निहोत्रविधिवदेकस्यैव कर्मणः कदाचित्केन चिद्वाक्येन विधिसंभवाद्वा· एवं प्राप्ते ब्रूमः· सर्वत्र हि आख्यातप्रत्ययस्य कर्मविधायकत्वमौत्सर्गिकं· विधेयांतरो
पादाने तु गौरवभियात दनुवादकांक्षा· तस्यां च सत्यां पूर्वकर्मप्रत्यभिज्ञातां शमयति· यदा तु न पदांतरोपात्तं विधेयं तदा कर्मप्रत्यभिज्ञानस्यानानुवादकारणत्वं· न च
प्रकृते विधेयांतरोपादानमस्ति· समिदादिदेवतानां मंत्रादेवप्राप्तेः। अत एव तत्प्रख्यन्यायेन समिदादिनामधेयं· द्वितीयांतस्यादेवताविधायकतायाः सति प्रत्ययांत
रे कल्पनायोगाच्च· समिदादेरपि देवताविधायकत्वेन तद्वरूहेकर्मणि देवतांतरविधानायोगाच्च· तस्मादनन्यपरविधायकपुनः श्रवणरूपाभ्यासेन कर्मोत्पत्तिविधित्वावगमा
त् अभ्याससहायेन विधिना कर्मभेदः· तदुक्तं· आख्यातप्रत्ययाः पूर्वविधनेकर्मशक्तितः· अनेनास्तिप्रशक्तिस्तत्तदा कस्मिन्नपूर्वदिति मिति· न च बलीयस्त्वात्प्रत्यभिज्ञयैकं
यतः· श्रुतेः कर्मांतरज्ञानं संनिधेरेककर्मधीः· तत्र श्रुतिबलीयस्त्वे ज्ञानतां कथमेकता· न चात्रयजिश्रुत्यैवैकतापि बुद्ध्यारूढेति वाच्यं· यतः· यागोयमिति विज्ञानं य
जिश्रुत्येष जन्यते· स एवेत्यन्य एवेति व्यापारोस्या न विद्यते· ननु सर्वत्र नामधेयगुणविधिपरं नामधेयं वा· तथा च संज्ञागुणान्यतरेणैव भेदसिद्धेः अभ्यासो भेदकः· तथा हि

शा·दी· गुणो वा नामधेयं वा समिदादिपदं भवेत्· ताभ्यामेव च भेदो न किमभ्यासः करिष्यति· किंच· प्रयुज्यते हि वेदेषु नाख्यातं केवलं क्वचित्· नाम किंचित्प्रयुक्तं चेत्तत्रचोक्तं गतिद्वयं

८ ·उच्यते· नामार्थनिर्णयस्याख्यातनिर्णयाधीनत्वेन तदर्थविचारात्प्राक भेदाभेदयोरुदासीनमेव नाम· आख्यातार्थे हि विधेये ज्ञाते तत एव भेदसिद्धिः· अनुवाद्ये तु नैव भेद

8 इति· न चैवं संज्ञागुणयोः क्वापि भेदकत्वं न स्यादिति वाच्यं· आख्यातव्यापारभाव एव तयोर्भेदकत्वात्· यथा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनं· अथैष ज्योतिरिति· क

ल्पस्याख्यातस्य कल्पकपारतंत्र्यात्· ज्योतिरादौ च एतेन सहस्रदक्षिणेन यजेतेत्यस्य गुणान्वयव्यापृतत्वात्· एतेन काङ्क्षितकामो यजेतेत्यस्य फलान्वयव्यापृतत्वात्· प्रकृ

तेत्वनन्यपरो विधिरिति विशेषः· उक्तं च· आख्येयाख्यानसंबंधिना भेदपारतंत्र्यमाक· तस्यैव यद्यमंतेन भेदाभेदनिमित्ततेति· २ प्रकरणांतु पौर्णमास्या रूपावचना

त्· अभ्यासस्यापवादोयं· यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति· तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्· ताभ्यामेतमग्नी

षोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्· ऐंद्रं दध्यमावास्यायामैंद्रं पयोऽमावास्यायामिति कालसंबद्धानि श्रूयंते· तथा समिधो यजतीत्याज्यभागौ यजतीत्यादीनि

अकालसंयुक्तानि· तेषां समिधो य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इति वाक्यद्वयं श्रूयते· तथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलं श्रु

तं· तत्र विद्वद्वाक्यगतौ यजती प्रकृतानामाग्नेयादीनामनुवदितारौ उत पूर्वयोः कर्मणोर्विधातारावितिसंशये पूर्वाधिकरणन्यायेन कर्मांतरत्वमेव युक्तं· न चेह गुण

फलनिमित्तनामधेयं किंचिदुच्यते यत्र विधिर्व्यापृतः· कर्मस्वरूपविधानमुपेक्षेत· पंचमलकारस्थ समिधो यजतीत्यादावविकल्प्यः· सत्यपि यक्ष्ये उपनधेयद्वाग्नेयो राम

ष्टाकपाल इत्यादिवद्विधिशक्त्या विलोपः· न च शाखांतरीयवद्विधिविकल्पः· शाखांतराणां पुरुषांतरं प्रतिसार्थक्यात्· न च रूपालाभः· यतः· द्योतं साधारणाद्यं देवता। ८

मांत्रवर्णिकी· रूपवत्तात्तत्त्याग्यो विधीयेते प्रथक्त्वा· चतुर्धाकरणं हानीति हि असंयुक्तोत्पन्नं द्योतमाज्यं प्रयोजनापेक्षं व्यापेक्षिणां प्रकारणगतानां सर्वकर्मणां

लिंगप्रकरणाभ्यामंगांगवत्तूपांशुयाजादीनामिवानयोरपि कर्मणोर्लभ्यते सर्वस्मैवा एतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्यमितिवचनाद्वा तथा आज्यभागयोः क्रमेच
नप्रत्तोनुवाक्याः पठ्यंते ह्याग्नेय्यो ह्सौम्यौ तास्वबलीयस्त्वात्वाक्येनतत्रस्थाच्छियानयोः कर्मणोर्विधीयेते वार्त्रघ्नीपौर्णमास्यामनूच्येतेवृधन्वतीअमावास्यायामि
ति तेनानुवाक्याद्वयस्यतुल्यार्थतयाविकल्पमानस्यानुरूपायाज्यापिकल्प्या एवंचश्रुतिविहितमंत्रसंबंधान्ययानुपपन्नाः प्रोषोमौदेवतेत्यध्यवसीयते तस्माद
स्तिरूपलाभः अतः कर्मांतरविधानमितिशास्त्रेभिधीयते अरूपत्वाद्धिधेयस्य प्रकृतेशब्दशक्तितः तत्रैवरूपलाभाच्चसमुदायानुवादता इत्यंकथंचित्सप्तमेनदेवतानु
लभ्यते लभ्यतेमंत्रवर्णाच्चेन्नाज्यभागांगतायतः लिंगक्रमाभ्यामंत्राणामाज्यभागांगतास्थिता वचनंतुव्यवस्थार्थमल्पार्थत्वादबाधतः सर्वत्रहि अविरोधेनवा
क्यंनिविशमानेविरोधपरिहारस्यकृत्यः इहचपौर्णमास्यमावास्याशब्दयोः कालपरतायांलिंगक्रमाविरोधेनापिअस्तिगतिः किंच प्रथमंकालएवाभ्यांशब्दाभ्यां
प्रतिपाद्यते पश्चात्तुकर्मतद्योगाद्दतः कालोत्रगृह्यते अपिच कालस्यसर्वाधारतयासन्निधेरप्युपपन्नतरा त्वत्पक्षेतुकर्मणोऽधिकरणत्वानुपपत्त्यायेनकर्मणोर्मंत्र
त्रनयानूनुह्याद्दित्यत्रेवयथाकथंचित्सप्तमीनीयेत तदिहआज्यभागोपस्तितादर्थ्यस्थितेसंकरेआग्नेकालाभेदेनव्यवस्थामात्रंक्रियतेवार्त्रघ्नीपौर्णमास्यांस्थयोरा
ज्यभागयोः वृधन्वतीअमावास्यास्थयोरिति अतोऽरूपत्वान्नविधिः यएवंविहानित्यनुवादस्वरूपत्वाच्च यत्तुयदाग्नेयइत्यादिवद्भविष्यतीति तन्न याईदृशीक्रिया
तांकुर्यादितिक्रियात्वरूपानुवादेपिकर्तव्यत्वानुवादत्वेनक्रियासमानाधिकरणस्यपदस्य ह्सविधिशक्त्यप्रतिबंधकत्वात् इहतुकर्तृसमानाधिकरणस्यकं
पदस्य ह्स्यकर्तव्यत्वानुवादितयावैषम्यात् तदाहुः क्रियापदैकयोगित्वेपदस्थोनरुजेद्विधिं कर्तृयुक्तः सएवान्यथापितार्थानुवादकृदिति नचानुवादस्यानर्थकं
यतः यथैवोत्पत्तिवाक्यानांप्रयोगवचनांगता तथैवतदुपादानात्तद्वित्त्वसिद्धानयोरपि वाक्यद्वयेनहिसमुदायद्वयेकल्पितेदर्शपूर्णमासाभ्यामितिद्विवचनंसिद्ध

शब्दांत
८

ति॰ नत्वन्यथा॰ आग्नेयादीनां विप्रकीर्णत्वात्॰ आह च॰ एककालाभिसंयोगात् भिन्नानामपि कर्मणां॰ समुदायार्पणं शक्यमेकदेशस्थरत्नवदिति॰ यद्यप्येतौ
समुदायिवाचिनौ तथापि तद्व्यक्तिसमुदायगतसंख्याहारेणैकवचनान्तत्वं विभाते॰ ननु समुदायः संज्ञी॰ यागसामानाधिकरण्ये न तन्नानुवादत्वमिति॰ उ
च्यते॰ प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः॰ अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॰ विशिष्टभाव॰ नां हि विदधानो विधिः सकृदुच्चार्यनिवृत्तव्यापारः श
ब्दार्थान्यथानुपपत्त्या सर्वविशेषणेभ्युपगत्यैकनिष्ठानि विध्यंतराणपाविर्भावयन्समाम्नानैकरूपेणैव सकृदुच्चारणफले वर्तते॰ अतोऽनेकविध्यन्तरप्रसवस
मर्थैकविशिष्टविधिप्रसादेनानेकगुणविधानमपूर्वभावनाविधिपक्षे सुलभं॰ नेतरत्र॰ कथं॰ प्रधानं नीयमानं हि तत्रांगान्यपकर्षति॰ अंगमाकृष्यमाणं हि
नांगांतरमसंगतेः॰ यदा तु भावनाऽन्यतः प्राप्तान्तदा तस्यां पिण्डविशेषणवत्प्रतिहतशक्तिर्विधायकत्वाभावविदधत्स्वानर्थक्यात्तदंगोष्वितिन्यायेन भावनातोवतीर्यत
त्संबद्धानि कारककारकाण्युपसर्पति॰ तत्र यावंत्येकपदोपात्तेकाकारकविशेषणानि जातिद्रव्यलिंगसंख्यादीनि तानि विशिष्टभावनाविधिन्यायेन तत्कारका
क्षेपेण सर्वाणि विधीयंत इति प्राप्तायामपि भावनायामनेकार्थविध्युपपत्तिः॰ यदा तु अनेकपदोपात्तमनेकं विधिरूपसर्पति तदा एकत्र गतो नेतरदाक्षेप्तुं शक्नो
तीति विविध्यावृत्तिलक्षणो वाक्यभेदः॰ तदिहाग्नेयोऽष्टाकपालः पौर्णमास्यामिति वाक्ये आग्नेयाष्टाकपालयोः सामानाधिकरण्यात्तु हि तत्सन्निहितद्व्यवचनत्वा
त् पौर्णमासीसंबंधात्यागेवसंबंधो यद्यपि लभ्यते तथाप्यपूर्वत्वादत्रैवासौ विधेयः॰ पुनः पौर्णमासीसंबंधोपि विधेय इति आवृत्तिप्रसङ्गः॰ न ह्येवं संभवति॰ य आग्नेयो
ऽष्टाकपालः स पौर्णमास्यामिति अनुवादप्रसिद्धेः॰ एकवचनव्यक्त्यंतरमपि दूषणीयं॰ तस्मात् भावनांतरं द्रव्यदेवताविशिष्टमाग्नेयप्रयाजिकं यद्वाग्नेयइत्यत्र विधेयं॰
न तु विहिताक्यविहितकर्मानुवादः॰ तस्मादरूपत्वात् समुदायानुवाद एव विद्वा को॰ प्रयोजनं तु पूर्वपक्षे फलवाक्यगतेन यजिना सन्निहिताः सर्वयागाः राजसूयवत्फ
६

राम
८

लं प्रतिविधीयमानो· समप्रधानं· नच दर्शपूर्णमासाभ्यामिति संकोचः· यतः प्रकृतिप्रत्यययोः पूर्णौ विशेष्टं यजतिं तमो आग्नेयाद्यान्यभागादावेकत्वैकार्थशून्यता
· यद्यप्याग्नेयादिषु स्वाभिधेयकालयोगात्प्रातिपदिकं वर्तते तथापि तेषां बहुत्वात् द्वित्वानुपपत्तेरसमर्थं पदं· आज्यभागादौ तु द्वित्वोपपत्तावपि प्रातिपदिकमसमर्थं
· नच विद्वद्वाक्यविहितावेव यागौ फलाय विधीयेते इति वाच्यं· आग्नेयादीनां षण्णामनयोश्च कालसंबंधसाम्येन विनिगमनाविरहात्· नचाष्टौ यागाः कालगतद्वित्वापेक्षया
लब्धविशेषणाः· संतः फले विधीयंतामिति वाच्यं· प्रकृतयागमात्रावलंबिना प्रत्ययेन स्वार्थस्य स्फुटेन देशेन संकोचायोगात्· कालयागयोरत्यंतभेदेन कालगतसंख्याया या
गसामानाधिकरण्यायोगात्· द्वितीयपूर्वपक्षे तु विद्वद्वाक्यविहितकर्मणोरेव फलसंबंधः· तत्र चोत्पन्नशिष्टस्य सांनाय्यपुरोडाशादेर्विकल्पः स्यात्· ।सिद्धांते तु
शब्दद्वयेन समुदायद्वयापादनात् प्रमसमुदायीकृतयागवैलक्षण्यात् समुदायसमुदायिनोश्चाव्यतिरेकात् द्वित्वयोगे संभवति यागविशेषणत्वं· ततश्च प्रया
जादीनामंगत्वसिद्धिः· एवं च यद्धस्यतिचतुर्थेन्द्रदर्शपूर्णमासयोरिज्याः प्रधानानीति· तत्र एतदधिकरणप्रसादात् सिद्धांतसिद्धिः· इतरथा हि तत्पूर्वपक्ष एव स्यात्·
एवं पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति कालसंयोगोऽपि समुदायानुवादप्रयोजनं· यद्यप्युत्पत्तिवाक्याद्धन्योन्यनिरपेक्षाणामाग्नेया
दीनां निरंगानां कालसंयोगः सिद्धस्तथापि द्वितीयासंयोगात्करणत्वं प्रयोगवाक्यादितरेतरयुक्तानामंगसहितानां चावगतमिति तादृशानामेवानुपादेयं कालं प्र
त्युपादानात् सांगस्य त्रिकस्य पौर्णमास्याममावास्यायां च तंत्रेण प्रयोगः सिद्ध्यति· यथा चैतत्तथा एकादशे स्फुटं· यद्वा यः पशुना सोमेन वा यजेत सोमावास्यायां पौर्ण
मास्यां वेत्येतत्पुरस्तादेव किंचित्करत्वात् सद्यस्कालतायै विकृतौ गच्छति· ३ पौर्णमासीवदुपांशुयाजः स्यात्· अतः परं समुदायानुवादापवादकतया ऽधि
करणत्रयमारभ्यते· दर्शपूर्णमासयोः श्रूयते· जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपांशुयाजमंतरा यजति· विष्णुरुपांशु यष्टव्यो ऽजामित्वाय· प्रजापतिरु

शा॰दी॰
१०
10

पांशुयष्टव्योऽजामित्वाय· अग्नीषोमावुपांशुयष्टव्यावजामित्वायेति· तत्र संदेहः· उपांशुयाजमंतरा यजतीति किं विष्ण्वादिगुणकानां यागानां समुदायानुवा
दः आहोस्विद्विधिरिति· तत्र विष्ण्वादिवाक्येषु तव्यप्रत्ययदर्शनात्· ऐकांतिको विधिर्नात्र वर्तमानापदेशात्· वैश्वानरवाक्ये हि यदष्टाकपालो भवतीत्यादिषु वि
धिपुरुषव्यापारयोरश्रवणात् यच्छब्दोपबंधाच्च द्वादशकपालं निर्वपेदिति विधियुक्तभावनाश्रवणात् तदुपक्रमोपसंहारमध्यवर्तिनामष्टत्वादीनां तदेकवा
क्यत्वं न वा विधित्वमिति गुणफलविधानं निरस्तं· इह तु सत्यपि जामित्वाजामित्वोपक्रमोपसंहारमध्यवर्तित्वे यच्छब्दाद्यनुपहतविधिश्रवणादजामित्वाये
ति च प्रत्येकं उपक्रमोपन्यस्तजामित्वदोषपरिहारप्रशंसावगमात् वाक्यं भित्त्वा विधिरेवाध्यवसीयते· जामि वा एतदिति चोपक्रमस्थ्येयाणामप्यनुषंगेण ना
काशेषो भवति· उपांशुयाजमंतरेति तु जामित्वोपन्यासेन गम्कतानां वक्ष्यमाणानां विष्ण्वादियागानां समुदायानुवादः न तु विधिः· वर्तमानापदेशात् रूपालाभाच्च· न
चाग्नेयाग्नीषोमीयपुरोडाशयागाग्नीषोमीयपुरोडाशयाज्यानुवाक्यायुगलयोर्मध्ये शाखाभेदेनाम्नातानां वैष्णवप्राजापत्याग्नीषोमीयानां याज्यानुवाक्यायुगला
नां बलेन मांत्रवर्णिकदेवतालाभात् स्वरूपलंभ इति वाच्यं· लिंगक्रमाभ्यां विष्ण्वादिदेवत्ययागेष्वेव तेषामंगत्वात्· समुदायानुवादप्रयोजनं तु उपांशुपौर्णमा
स्यां यजन्तीत्यत्र एकीकृतानां कालसंबंधे सति सर्वेषां साधारण्यसिद्धिः· एवं प्राप्तेऽभिधीयते· जामित्वोपक्रमादेकमजामित्वोपसंहृतेः वाक्यं· तन्मध्यपाताच्च
विष्ण्वादेरर्थवादता· वाक्यशेषानुषंगस्त्वगतौ सत्यां न युज्यते· अनूचीननिमित्तश्च अजामिदोषः प्रकीर्तितः· तेनांतरालसंयुक्तो विधिस्तत्रैव निष्ठितः· स जामित्वं
चात्रैव प्रशंसेत्यवधारितं· पुरोडाशनैरंतर्ये हि जामिता स्यात्· अतो यत्र कुत्र विहितस्यादयो यष्टव्या इत्युक्ते हि किं केन संगतं· तस्मादंतरालोपलक्षितकाले उपां
शुगुणको यागो विधीयते· तदर्थवादत्व विष्णुरुपांशुयष्टव्य इत्यादिः· मंत्रवर्णप्राप्तविष्ण्वाद्यनुवादेन· एवं च न वाक्यभेदो न वाऽनुषंगदूषणं· तस्माद्विधिरयं· तस

राम
१०

मुदायानुवादः तावत्कृतमिति तु कालविधिपरं तत्फलं च प्राधान्यसिद्धिः नच समुदायानुवादस्य प्रयोजनमस्ति तथाहि त्रयाणां वैश्वदेवादीनां समुदायेवधारिते आ
ग्नीषोमीय एवैकः पौर्णमास्यां विधीयते सिद्धान्ते तु देवतोपलक्षितयागस्य कालसंबंधात्तस्य चैककालत्वात् वैकल्पिकदेवतांतरसंबंधेपि प्राधान्यमुपपद्यते ए
वं च इदं यमुपांशुयाज इति यत्र पुरुषस्य प्रधानप्रायेणावयवेन संस्तवोप्युपपद्यते तदुक्तं सूत्रकृता प्रायेवचनाच्चेति ४ आघाराग्निहोत्रमरूपत्वा
त् । अग्निहोत्रं जुहोति आघारमाघारयतीति निर्गुणं कर्म संज्ञासंयुक्तं श्रुतं तत्संनिधौ च दध्ना जुहोति पयसा जुहोतीत्यादि ऊर्ध्वमाघारयति ऋजुमाघा
रयतीत्यादि च श्रुतं तत्र संशयः किं दध्ना जुहोतीत्यादि निर्गुणविशिष्टहोमान्तराघारान्तरविधीयंते तेषां चाग्निहोत्रं जुहोति आघारमाघारयतीति समुदा
यानुवादो तु तेमावेव कर्मविधी इतरे तत्रैव गुणविधय इति तत्र रूपापरिज्ञाने विशेषानवधारणात् सामान्यस्याविधेयत्वात् नानयोर्विधिसंभवः न
च दध्यादिभिर्विकल्पः प्राप्तकर्मानुवादात् गुणमात्रं विधातव्यमव्यापारात्मकं यतः किंच विधित्वं यत्प्रयोपाशंननामपदमस्ति तद्धि विधिभावनातश्चे
तस्यैव पूर्वं विधीयतां अग्निहोत्रं जुहोतीति हि वर्तमानापदेशात् रूपालाभात् च न विधिः दध्नेत्यादयस्तु रूपलाभात् गुणविधिपक्षेपि लेडूपरिग्रहस्या
वश्यकत्वात् केवलदध्यादेर्विध्यन्वयायोग्यत्वात् च विशिष्टविधिः तथा च विहितानां समुदायीकरणार्थम् अग्निहोत्रं जुहोतीत्यादि तत्फलं तु यावज्जीवमग्निहोत्रं जुहो
तीति निमित्तचोदनायां अग्निहोत्रं जुहुयात्स्वर्गकाम इति फलचोदनायां चैकत्वसिद्धिः तथा इदं ऊर्ध्वमध्वर इति मंत्रविनियोगेनस्याघारमाघारयेदिति च द्रव्यविधानेक
त्वसिद्धिः एवं प्राप्ते ब्रूमहे प्रकृतानामसद्भावात् कर्मणां नानुवादता नहि दध्यादिकाकेषु दध्याद्याचिप्तशक्तिना विधिना शक्यते कर्म विधातुमिति स्वतु अनन्याश्रि
त्प्रशक्तित्वाद्धि विधिः कर्मैकगोचरः दध्यादिचित्तशक्तिको हि विधायकोऽनेकविधानिमित्तयोरेव परिजिहीर्षया कर्मानुवादं प्रार्थयमानो यदि न कथंचिदपि प्राप्त

शा॰दी॰ श्चिनत्वमेतन्नतो ऽगत्या विशिष्टविदधात् । सत्यां त्वग्निहोत्रादिवाक्येन कर्मणः प्राप्तौ तदनुवादेन गुणमात्रं विधत्ते लाघवात् । नं तु विशिष्टं । अत एवाविहित
११ त्वाद्धोमानामग्निहोत्रादिवाक्यं विधायकं । यद्यपि तत्र रूपं न ज्ञातं तथापि विधिवशाद्देवतासामान्यमतिक्रम्य तल्लिङ्गितो होमविशेषो ऽयमित्यवगते तस्यैवसंतोपबंधः
रूपत्वात्सक्तद्दध्यादिवाक्यैः । यद्यपि क्रियां विहाय केवलं दध्यादिरिति विधिर्न घटीयते तथापि विशिष्टक्रियायां प्रतीतो विधिः प्राप्ताप्राप्तविवेकेन गुणपरता
मवलंबते । अतः फलतो गुणविधिः प्रतीतितस्तु सर्वो विशिष्टविधिरेवेति मतं । नन्वेवं सति विशेषणेष्वनेकेषु विधायको भावनाद्वारेण पूर्वकर्मविधिवत्प्र
प्रकर्मविधानेऽप्यनेकं विदध्यादिति चेन्न । यत्परो विधिस्तस्यानेकत्वे वाक्यभेदापत्तेः । आह च । विधित्वे भावनास्थेऽपि तादर्थ्यं प्रविभज्यते । विशेषणफले चास्मिन्वा
क्यभेदो ऽवतिष्ठतीति । ननु यदग्नये च प्रजापतये च सायं जुहोतीत्यत्रानेकगुणविधानाद्विशिष्टाग्निहोत्रविधिरावश्यकः । एवं सूर्याय प्रजापतये च प्रातरित्य
त्रापि । अतो ऽग्निहोत्रं जुहोतीति समुदायानुवाद एवेति चेन्न । सायं जुहोति प्रातर्जुहोतीति वाक्यान्तरप्राप्तकालः प्राप्तः । देवताद्वयस्यापरेणावाक्ये न संकीर्त्यते । न च का
लविशिष्टकर्मानुवादाद्वाक्यभेदः प्रकरणेन लब्धे कर्मणि कालमात्रे देवताविधानात् । न च प्रकरणान्न्याविशेषाद्वाक्यभेदं इति न चैवमपि देवताद्वयविधाना
द्वाक्यभेदः । मान्त्रवर्णिकाग्निसूर्ययोरन्यतरस्यैवाग्निहोत्रोपादानात् प्रजापतेरेव च विधेयत्वात् । न च पूर्वपक्षे समुदायानुवादप्रयोजनमस्ति । राजसूयेन स्वाराज्यकामो य
जेतेत्यादौ विधिवचनान्तरं विनापि फलवाक्यादेव समुदायसिद्धेः । दध्यादौ गुणविधिं निराकुर्वतां तस्य प्राधान्यमित्यादावपि विशिष्टविधेरेवावाच्यत्वाच्च । नन्वेवमा राम
परग्निकानामपि होमानां प्राधान्यं स्यादिति चेन्न । दृष्टापत्तेः । समुदायानुवादेऽपि तत्सतुल्यत्वाच्च । सिद्धान्ते तु एकमेव कर्म सर्वेष्वग्निषु साक्षात्क्रियते । ततश्चैतदु ११
लादिवाक्यवदेव गार्हपत्यादिसंयोगस्य गुणार्थत्वान्न कर्मभेदः । न चैवं दध्यादिद्रव्यवद्देवताग्नीनामपि विकल्पापत्तिः [illegible] गार्हपत्यान्वाहार्यपचनयोश्चैत

तस्मात्तत्र आहुतीराहवनीये चेहे विधाय एवं विद्वान् विराट्संपन्नमग्निहोत्रं जुहोतीति वचनात् संख्यायुक्तेषु समुच्चय इति न्यायेन समुच्चयसिद्धेः। यत्तु निरा
धारस्यापि ग्रहेऽपस्य संभवात् अदृष्टार्थोऽग्निरिति समुच्चयः सिद्ध्यतीति तन्न। पदादिभिरपि आहवनीयबाधानापत्तेः। तत्र अग्नेरदृष्टार्थत्वेऽपि सप्तमीबलादाधारत्वहार
कमदृष्टमिति प्रतीतेराधारत्वस्य च पदेनावाधात् समस्तजुहोति होमो नाधिकरणमर्हतीति अग्निबाधश्चेत् इहापि तत्तुल्यमिति चेत् कल्प्यमनः। आह च। अग्न्यायोपूर्वसिद्धिः स्यादाधार
त्वोपलक्षिता नचैकेनावरुद्धत्वादाधारान्तरसंभवइति। तस्मात् संख्यावचनादेव समुच्चय इति तत्त्वं। नचैवं तिस्र आहुतीर्जुहोतीति वत् संख्यया कर्मभेदापत्तिः। तत्रोत्पत्तिशिष्ठा
संख्या भेदिका। इह तूत्पन्ने कर्मणि प्रतीयमाना एकादशगायत्र्यादिवदभ्यासमेव तत्पूर्यते। तेन एकमेव सर्वाग्निष्वभ्यासं कार्यमिति हांतः। नचैवमपि सायंप्रातःकालयोर्विकल्पाप
त्तिः सर्वे सायंप्रातस्स्वजुहोतीति वचनान्तरेण समुच्चयविधानात्। नच समुच्चये साहित्यापत्तिः अनुपादेयत्वादिति दिक्॥ ५ ॥ द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको
द्रव्यसंयोगो नहि तस्य गुणार्थेन यादीशाव। तस्मात्। यथाग्नेयादिवाक्यानां नयागान्तरानुमानतः स्वार्थपर्यवसायित्वं तथा सोमेऽपि दृश्यतां। नचायं तत्र देवतासंबंधमात्रं तत्राहितदीःतेवा
क्यं मरुत्वतीयादिषु तदसंभवात्। देवताया भवत्वविधानात्। तथा च इन्द्रवायवादिष्वपि तद्वाक्ये किमनिरूपितसंबंधमात्राश्रयणेन। तस्मात् यागविधानं सोमेन यजेतेति तु देवताभा
वेनारूपत्वात्समुदायानुवाद एव यजिः सोमशब्देन तु तत्रैव गृह्यतिनामासामान्यासिद्धं द्रव्यं नियम्यते। यद्वा तिनो यदग्नीषोमीयं पशुमालभत इति श्रूयते। हृदयस्याग्रेऽवद्यत्यथ
जिह्वाया अथ वक्षस इति च तथा सोमेन यजेतेत्युक्तं ऐन्द्रवायवं गृह्णातीमे वा वरुणं गृह्णाति च। तत्र किमवद्यति गृह्णातिभ्यां चोदितानां कर्मणां समुदायस्यालम्भति यजती अनु
वदितारौ उतापूर्वयोः कर्मणोर्विधातारविति संशयः। तत्र अग्नीषोमीयपशुमालभत इत्यत्र यागविधौ सत्युत्पत्तिशिष्टपशुद्रव्यावरुद्धयागे हृदयादिनिवेशासंभवात् हृदयादिवा
क्यविहितहृदयादिद्रव्यकयागानुवादेन देवताविधानमिति युक्तं। छागस्य वपाया इति मंत्रवर्णाच्छागप्रकृतिकानां हृदयादीनां पशुशब्देनानुवादः। नच हृदयादिवाक्ये देवता

संबंधाश्रवणात्तत्कर्थंयागकल्पनमितिवाच्यं· हृदयाद्यवदानानांप्रात्यवदानप्रकृतिकतयासांनाय्यवत्हृदयादेरपियागसाधनत्वात्· अग्निषवयुक्तपूतीकवत्‌यथा· अवदा
शक्षा· नमात्रेविहितेतदाश्रितस्पर्शनमालम्भतिनानूद्यते·पशुशब्देनचोपचारात्हृदयादि· अग्नीषोमीयपशब्देनतुहृदयादिद्रव्यो अग्नीषोमीयत्वेनविहितेनतेनदेवताबंधोयोगाः कल्प्यंते·न
१२ च्या·ऐंद्रवायवमित्यादिद्रव्यदेवतसंगतेः· यागएवविधानयोगहणेन हिदेवता·नहिदेवता·नहिग्रहणेनेंद्रवायवंकुर्यादितिवाक्यार्थः· यागान्तरेणदेवतासंपादनायोगात्·ना
येंद्रवायवसंतंगृह्णातीति· अप्रसिद्धस्यानुवादायोगात्·तस्मात्·यथाग्नेयादिवाक्यानांनयागप्रमाणानुमानतः· स्वार्थपर्यवसायित्वंतथासोमेपिद्रष्टव्यं·नचायंतसेदमिति
संबंधमात्रेणहितइतिवाच्यं·मरुत्वतीयादिषुतदसंभवात्·देवतायामेवबहुविधानात्·तथाचैंद्रवायवादिष्वपितथास्तु·किमनिरूपितसंबंधमात्राश्रयणेन·तस्माद्याग
विधानं·सोमेनयजेतेतितुदेवताभावेनारूपत्वात्समुदायानुवादएवयजिः· सोमशब्देनतुतैर्वगृह्णातिनासामान्याद्विशेषद्रव्यंनियम्यते·यद्वा आघाराद्याधारयागगृह्णातीतिगु
णवाक्येनधारासमर्थद्रव्यमात्रावगमात्तत्प्रकृतित्वेनसोमोविधीयते·आहच·यथैवास्याकपालादौश्रौतेपिसतिवाक्यतः·ब्रीह्यादयोविधीयंतेतथासोमोविधास्यतइति·
यद्वा·सोममभिषुणोतीत्यादिभिः·सोमरसस्याप्राप्तत्वात्सोमशब्दस्तत्प्रख्यन्यायेननामधेयं·सर्वथापिचयागभेदादैंद्रवायवादीनांसमुच्चयेसतिदशैतानध्वर्युः प्रातःसवनेग्र
हान्गृह्णाति·आश्विनोदशमोगृह्यतेतंतृतीयंजुहोतीतिक्रमसमुच्चयदर्शनमप्युपपद्यते· अन्यथातुयागस्यैकत्वात्तदर्थानांदेवतानांग्रहाणांचविकल्पः स्यात्· किंच·उत्पत्ति
वचनात्सिद्धालतायागसाधनं·नसावाक्यांतरेणपश्चाद्रसीभवितुमर्हति· तथाचैंद्रवायवादिवाक्यानिगुणंविधातुमसमर्थानिप्रस्थानर्थकान्येवस्युः· एवंप्राप्तेभिधीयते·इ
यीतरेणासंयोगात्नानुवादोवकल्प्यते·तेनयागविधीणतावन्यगुणविधायिनः· पशुशब्दोहिजातिवाचीअतत्सातीयेषुहृदयादिषुलाक्षणिकः स्यात्·नचपशुविशिष्टेया राम
गेविहितेहृदयादिवाक्यानांगुणविधित्वासंभवः· पशोरेवहृदयादिद्वारेणाकरणत्वोपपन्नेः·तुषपकामवंतीत्यादौअश्वादिद्वारतुषादीनामिव·तस्मात्पशुविशिष्टेग्नीषोमदे १२

वत्यएकोयागोविधीयते· इह यादिवाक्यानितुतत्रैवसंस्कारविधायकानि· नतुयागविधायकानि· अवघातः खंडनमात्रपरत्वात् नचास्ययागद्रव्यार्थत्वमितिकार्त्यायनाः येनतदति
दिश्यते· नचेदृशेर्थेसामान्यतोदृष्टंक्रमतेतथासोमशब्दोलतावचनः नचासोमप्रकृतेष्वैंद्रवायवादिषु ग्रहविशिष्टेनविधातुंशक्यते· धारयाग्रहानीतियुक्तवाक्यसंनिधापितस्यैंद्रवाइ
यस्यैंद्रवायवमितितद्धितेनदेवतासंबंधित्वेनकृत्वा अभिधानात्· नापितत्प्रख्यन्यायेननामधेयत्वं· अस्माद्वाक्यात्प्राक्सोमरसस्याप्राप्तेः· नह्यभिन्यस्तेयएवंक्रयेसोमःसए
वाभिषवेयावनेचेतिनियमःसंभवति· सर्वेषांक्रयादिवाक्यानांलौकिकसोमग्रहणेनादृष्टोपकारकक्रयादिविधायिनीमिथोनपेक्षत्वात्· यदिहि· तंसोममभिषुणुयादितितच्छ
ब्दः श्रूयेत· सावैश्वदेवीतिवत्प्रकृतग्रहणंभवेत्· सोममात्रश्रवणात्स्वप्रकृतगामित्वं· एवंधारावाक्येपि· ऐंद्रवायवादिवाक्येषुप्रकृतगामित्वापिधारासमर्थमेवैंद्रवायंग्रहीतं· न
सोमरसः· अतोनतत्प्रख्यन्यायेननामत्वं· प्रकृतिद्रव्यविधानत्ववशिष्यते· नचतदास्यात्· यद्यैंद्रवायवादिवाक्येषुयागोविधीयेत· तेषुतुग्रहणमात्रमेवदेवताविशिष्टंविधीयते·
यद्यपियागमंतरेणातदनुपपत्तिः· तथापिसोमेनयजेतेत्येतत्सर्वत्रयागांतरकल्पनांनिरुणद्धि· दशमुष्टीर्मिमीतइतिचपरिमाणश्रवणात्तावतःसोमस्याल्पपरिमाणोःपात्रे
ष्वतिसमुच्चयेग्रहणासंभवाद्धाराग्रहीतानामेवचहोमात्क्रमसमुच्चयदर्शनमप्युपपन्नं· प्रयोजनंतुपूर्वपक्षेसोमविकारेष्वेकस्यैवग्रहस्यधर्मैःसकृदनुष्ठानेनचभवितव्यं· सिद्धां
तेतुप्रकृतितुल्यमेवानुष्ठानमिति· ६ इत्थंक्वानिवेशान्नेस्यायाकर्मभेदःस्यात्· गतोन्यासप्रसंगः· संख्ययाभेदइदानीमभिधीयते· तिस्रआहुतीर्जुहोतीतिश्रूयते· तत्रकिमे
कमेकंकर्मत्रिरभ्यस्यतेउतत्रीणीतिसंशये· आख्यातस्यसकृदुत्पाकर्मैकत्वबोधित्वे· संख्यासंपत्तिरभ्यासान्यथानेकादशत्ववदित्येवंप्राप्तेब्रूमः· स्यादेवंयदिकर्मैकांप्राग्रस्मा
द्ववोधितं· आख्यातमात्रात्तत्सिद्धोत्तावता आघमाणता· निर्ज्ञातसंख्येषुहिप्रयाजेषुएकादशत्वसंख्याश्रूयमाणाभ्यासेनपूर्यतइतियुक्तं· इहतुआख्यातमात्रस्यप्रमाण
त्वयात्ततः· कर्मैकत्वनिर्णयः· सहश्रुतपदांतरैःसंहत्याभिदधदेवाख्यातंसंख्यासामानाधिकरण्यात्बहूनिकर्माणिश्रुतसंख्याविशिष्टानिविधत्ते· इतिसिद्धोभेदः· अत्रक

शा·दी·
१३
12

मेणैव संख्याश्रवणात्पूर्वपक्षो मंद इति मत्वा सप्तदश प्राजापत्यान्पशूनालभत इति भाष्ये उदाहृतं· तत्र संशयः· किं सप्तदशपशुद्रव्यक एको यागः किं वा एकैकपशुद्रव्य
काः सप्तदश यागा इति· तदर्थं च किं प्रजापतिर्देवतास्येति कृततद्धितप्राजापत्यपदे एकशेषः उत प्रजापतिर्देवता येषामिति कृतैकशेषपक्षे ऽन्तानां देवतासंबंध इति युक्तं
च· किन्त्वयं तद्धितांतानामेकशेषः कृतो भवेत् किं वा कृतो भवेत् तस्मादेककर्मेति प्राप्ते ब्रूमः· सप्तदश कर्माणीति· न ह्यकृततद्धितसंबंधः कृतैकशेषाणामिति निर्णीतं· किं
त्वेकत्वस्यौत्सर्गिकत्वात्प्रजापतिर्देवतास्येति विग्रहार्थं तद्धितोत्पत्तौ पश्चादेकशेषः· आहो स्विदनेकापूर्वकल्पनाभयात्कृतैकशेषपक्षे द्व्यर्थस्य तद्धितेन देवतासंबंध इ
ति संदेहः· एवं संशये श्रुतिवदिति वाक्यशेषाद्यस्येत्येव युक्तं न तु येषामिति· प्रकृतौ हि सवनीयपशावग्नीषोमीये एकादशहृदयाद्यवदानद्वारेण साधनत्वमिति त
द्वैव प्राजापत्ययागसाधनत्वं पशोरवगम्यते· न· च यदि सप्तदशपशुद्रव्यक एको यागः कृतैकशेषतद्धितसंबंधित्वेनाभ्युपेयते तदा एकेन एकादशावदानगणे
न यागसिद्धावन्ये षोडश पशवो व्यर्थाः स्युः· यदि च एकैकमवदानमेकैकपशोः क्रियेत तदाप्येकादशपशूपयोगे षट् पशवो नर्थकाः स्युः· न च प्रत्येकं सर्वेषु पशु
ष्ववदानगणा इति युक्तं· यागसाधनीभूतस्यावदानात् इह च सप्तदशानां साधनत्वेन प्रत्येकं तदभावात्· तस्माद्विति पशुयागभेदहेतुः कृततद्धितस्यैकशेष इति नि
र्णीयते· आह च· संदिग्धे वाक्यशेषेभ्यो निर्णयः प्राक्समर्थितः· सामर्थ्याद्वा तदज्ञास्ति हृद्यं निर्णयकारणमिति· एवं च संनायकापिंजलानित्यादिष्वपि द्रव्यगतसं
ख्यातः कर्मभेदो द्रष्टव्यः· प्रयोजनं तु एकस्मिन्पशौ नष्टे कृत्स्नः पशुगण आवर्तेत पूर्वपक्षे· सिद्धांते त्वेक एव पशुरावर्तेत· न हि कर्मभेदे पशुः पशुमाकांक्षतीति· राम
२ संज्ञा चोत्पत्तिसंयोगात्· ज्योतिष्टोमं प्रकृत्य श्रूयते· अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति· तत्र एतच्छब्दपरामृष्टा १३
नां ज्योतिरादीनां यज्ञिनामसामानाधिकरण्येन यागनामत्वेनावस्थितं· तत्र संशयः· प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते उत

एवंनमान्येवंदक्षिणानि च कर्मान्तराणि विधीयन्त इति· तत्र अर्थैषशब्दयोः पूर्वप्रकृतापेक्षत्वात् तत्समानाधिकरणानां ज्योतिरादीनां प्रकृतहान्यप्रकृतकल्पनानुपपत्तेश्च पू
र्वस्यैव गुणविधिः· न च ज्योतिः शब्दस्य ज्योतिष्टोमे प्रसिद्ध्यभावः· वसन्ते वसन्ते ज्योतिषा यजेतेत्यादौ प्रसिद्धेः· एवं प्राप्ते ब्रूमः· नामान्तरश्रुतावर्थभेदस्यावगम्यते· बलवद्बा
धकाच्चासावन्यथात्वं प्रपद्यते· सर्वत्रैव हि अनेकार्थत्वानेकशब्दत्वयोरन्याय्यत्वात् शब्दान्तरदर्शनादर्थान्तरबुद्धिर्भवति· सा चोत्पन्ना बलीयसा प्रत्यभिज्ञानेन बाध्यते· न चे
हास्ति बाधकं· किंच· अधिकारार्थार्थशब्दबलेन प्रकृतकर्मबुद्धिर्विच्छिन्नैव· प्रकृतयागे गुणविधाने तु अर्थशब्दानर्थक्यं स्यात्· एतच्छब्दश्रुतिगतिज्ञायमानकर्मप
रत्वेप्युपपद्यते· तस्मात् पूर्वकर्मानिवेशिन्या संज्ञया एतेनेत्यादिकर्मान्तराणि विधेयत्वावगमात् प्रथमप्रतीता संज्ञाभेदादिकेति सिद्धं। आह च· अनुक्ते कर्मशब्देयामे
नापूर्वप्रवर्ता नवकर्मान्तरबुद्धिः सा कथंचिदपनीयते· ८ गुणाश्चापूर्वसंयोगे वाक्ययोः समत्वात्· । चातुर्मास्येषु वैश्वदेव्यामिक्षेति द्रव्यदेवतासंयोगानुमितं यागं विधा
याम्नायते· वाजिभ्यो वाजिनमिति· तत्र संदेहः· किमामिक्षावाक्यविहितयागे वाजिभ्यो वाजिनमिति गुणविधिः· उतानेनापि द्रव्यदेवतासंयोगेन यागान्तरविधिरि
ति· तत्र प्राप्तकर्मानुवादेनोभयविधानायोगात् वाजिनमेव केवलं पूर्वस्मिन् कर्मणि विधीयत इति प्राप्ते· न यथा हि वाजिनानामनेके चिद्देवताविशेषाः प्रसिद्धाः·
अतो रूढत्वाला मेऽवयवप्रसिद्धिर्गृह्यते· तदिह वैश्वदेव्यामिक्षेति वाक्ये नामिक्षारूपान्नवत्तया विश्वेदेवा वाजिनो वगताः· ते च पूर्वानुमितेन यागेनानुरक्ताः· अतो
वाजिपदो रूढद्रव्यदेवतासंबंधप्रगम्यमानया गातिक्रमणाभावात्तत्सद्भावे चान्यविषयार्थान्तरापत्त्यनुदयात् तस्मिन्नेव यागे वाजिनाख्यो गुणो विधीयत इति न क
र्मभेदः· आह च· आनंतर्योपदिष्टेन वाजेनान्नेन वाजिनः· विश्वेदेवाः प्रतीयन्ते न तत्र कर्मेह वाजिनं इत्येवं प्राप्ते ब्रूमः· पूर्वकर्मसंयोगानर्हो गुणः कर्मान्तरं कल्पयति·
अनर्हत्वं च द्वेधा· वाक्यभेदप्रसंजकत्वेन उत्पत्तिशिष्टगुणप्राबल्येन वा· तत्र विहिताविहितकर्मानुवादेन आग्नेयादिवाक्ये गुणो न विधीयते· वाक्यभेदप्रसंगा

शा॰द॰ तृ। किंतु विशिष्टविधिरेवेति पौर्णमास्यधिकरण एवश्रमेणाभ्युपचितं। इह तु उत्पत्तिशिष्टेन बलीयसा विरोधात्। उभौ हि द्रव्यदेवतासंयोगौ आत्मावरोधेनान्योन्या
१४ वकाशमप्रयच्छंतौ पृथक्कर्मणी कल्पयतः। तथा हि। पूर्वकर्मदेवतासंबंधितया वाजिनं न ग्रहीतुं शक्यं। तत्कार्यवृत्तिगुणावरोधात्। न च समुच्चयः। एकार्थत्वात्। ना
पि विकल्पः। अतुल्यबलत्वात्। उक्तं च। गुणानां तु परावरुद्धत्वात्पूर्वकर्मण्यसंभवात्। क्रियांतरमतिं कुर्याद्द्रव्यसंगतये गुणः। इति। कथं पुनरतुल्यबलत्वं। इत्थं। श्रुत्या वि
श्वेदेवानामामिक्षासंबंधः। वाजिनसंबंधस्तु वाक्येन। न च श्रौतेन निराकांक्षो वाक्यीयं प्रतीक्षते। ब्रीहियवादौ तु नान्यतरस्य प्रथमसंबंधः। येन एकान्वये निरा
कांक्षा क्रिया द्वितीयं न गृह्णीयात्। नन्वामिक्षाया अपि तत्पदसमभिव्याहाराद् वैश्वदेवसंबंधावगमात् कथं वाजिनसंबंधापेक्षया तस्याद्यत्वमिति चेत्। अस्त्येवं। त
थापि विश्वेषां देवानां तद्धितेन देवताविशिष्टद्रव्याभिधायिना आमिक्षायाः संबंधावगमः। वाजिनस्य तु वाजिभ्य इति चतुर्थ्या त्यज्यमानद्रव्योद्देश्यत्वप्रतीतिग्रहीतत्वरूपसं
प्रदानत्वावाचित्वात् तदेकदेशदेवतात्वस्य लक्षणया प्रतिपादनेन तत्संबंधस्य दुर्बलत्वात्। अत एवोक्तं। तद्धितेन चतुर्थ्या वा मंत्रवर्णेन वेष्यते। देवतासंगतिस्तत्र दुर्बलं तु प
रंपरमिति। तद्धितेन सर्वनामार्थवृत्तिना संनिहितविशेष्यस्यैवामिक्षाख्यस्य वैश्वदेवान्वितस्य प्रतिपादनाच्च। सांनिध्यापकत्वेन चामिक्षापदमुपयुज्यते। अतः सत्या
मपि पदांतरापेक्षायां यत्पदमेवाभिधत्ते तस्य श्रुतित्वं। उक्तं च। नैव हि द्रव्यमात्रस्य तद्धितैर्देवतोच्यते। अस्य शब्दाभिधेयस्य विशेष्यस्यैव देवता। तथा। आमिक्षां देवतायु
क्तां वदत्येवैष तद्धितः। आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणं। तथा। श्रुत्यैवोपपदस्यार्थः सर्वनाम्नाभिधीयते। तदर्थस्तद्धितेनैवं त्रयाणामेकवाच्यतेति। यदि तु द्रव्यमा
त्रस्य तद्धितो देवतां ब्रूयात्तथापि वैश्वदेवीति स्त्रीप्रत्ययेन समानपदगतेन स्त्रीद्रव्यमवगतं। वाजिनं तु न तथेति विशेषः। किं च। देवतयोरुभयोरपि विधानापत्तौ शास्त्रक राम
र्मानुवादेनानेकगुणविधानाद्वाक्यभेदः। उक्तं च। श्रुत्यैव समवायित्वं देवतानां स्वकर्मसु। वैश्वदेवश्रुतिस्तत्र वाजिशब्देन दुर्लभेति ॥ ९ ॥ अगुणे तु कर्मशब्दे गुणस्त १४

त्यजतीयेत· दध्नाजुहोति पयसाजुहोतीत्यादावपि गुणानामेककर्मनिवेशे सति विकल्पप्रसंगात् अन्यतरावरुद्धे अन्यतरनिवेशायोगाच्च भेदत्वमिति प्राप्ते ब्रूमः। सर्वे
षाममीषां अन्योन्यानालोचनेन अग्निहोत्रवाक्यावगतनिर्गुणकर्मणि पौर्वापर्यं विनैव निवेशात् तन्नैव गुणमात्रविधानं युक्तं· प्रमाणवशाच्च विकल्प इति·
१० फलश्रुतेस्तत्कर्म स्यात्फलस्य कर्मयोगित्वात्·। अग्निहोत्रं जुहुयात् दध्नेन्द्रियकामस्य जुहुयादिति श्रूयते· तत्र किमग्निहोत्रात्कर्मान्तरमुत तस्यैव गुणात्फल
मिति संशयः· तत्र· धात्वर्थात्फलमित्युक्तं भावनाप्रनिकर्षतः· विप्रकृष्टस्तु नामार्थस्तस्मान्नासौ फलान्वयी· भावार्थाधिकरणन्यायेन हि धात्वर्थ एव करणत्वेन विधी
यते· स च यदि यादृशो विधित्सितस्तादृश एवान्येनोत्पन्नः प्रत्यभिज्ञायते तेन तः फले विधीयमानोपि न भिद्येत· संनिधौ त्वविभागात्स्यादिति न्यायात्· स्वर्गयावज्जीववाक्ययो
रिव· इह तु· होमो हि प्रकृतः शुद्धः स्ववाक्यादवधारितः। सोस्मिन्दधिविशिष्टत्वान्नाविभागेन गम्यते· न च दध्ना जुहोतीत्यनेन विशिष्टलाभः· तस्मात् उत्पत्तिवाक्यत्वात् उत्प
त्तिवाक्येनैव हि सर्वाणि प्राकरणिकानि गुणफलवाक्यानि संबध्यन्ते· न तु परस्परेण· न च सैवोत्पत्तिर्वाक्यान्तरेण दधिमती कल्पिता सती इह उत्पत्तिविधित्वकल्पनां निरु
णद्धीति युक्तं· यतः· वाक्यान्तरेण तत्कर्म यथा दध्ना विशेषितं· तंडुलादिभिरप्येवमिति नैकात्मकं भवेत· किं च· दध्यत्र दशमे पक्षे तत् होमस्य विशेषणं· नित्यं चेंद्रियकामस्य ते·
नापि न निरूप्यते· तस्मात् दधिविशिष्टं कर्मान्तरमेवेदं फलाय विधीयत इति प्राप्ते ब्रूमः। यावद्धि विधिसामर्थ्यं धात्वर्थादनपोढं· तावद् यः फलसंबंधः स धात्वर्थस्य गम्यते·
भवेत्फलश्रुतिर्यानुगुणसंचरेति विधौ· भावनाविधिस्तु तेन यात्येकवाक्यतां· इह हि दध्याक्षिप्तो विधिर्धात्वर्थानुवादमाकांक्षते· न चाविधीयमानस्य फलसंबंधः· न
च विशिष्टविधिः· स्याद्धि द्व्यर्थविधानं तेस्तो कार्थविधिसंभवे· मत्वर्थश्चोपलक्ष्येत प्रत्यागो घ वा भवेत· होमेनेंद्रियं भावयेदिति हि करणीभूते होमे करणीभूतेनैव दध्ना संबं
धायोगात् दधिमता होमेनेति मत्वर्थो लक्षणीयः· अनर्थक एव वा दधिशब्द इति कल्पनीयं· गुणफलसंबंधे तु न कश्चिद्दोषः। न च जुहोतिपदवैयर्थ्यं· दधीन्द्रियविशिष्टं भा

शद्व:
१५
वनाविधातुंप्रत्ययोच्चारणस्यावश्यकत्वे स्थितेसाधुत्वार्थंचकस्यचिद्धात्तोरावश्यकत्वेप्रकरणलब्धाश्रयानुवादकस्यजुहोतेरेवोचितत्वात्· आहच· नदधीइयसंबं
धोभावनावचनाद्विना· नचास्योच्चारणंशक्यंकेनचिद्धातुनाविनेति· तस्मात्तुभावनाभेदेपिधात्वर्थोनूद्यमानत्वान्नभिद्यते· तस्याश्चभावनायांगुणेकरणत्वेनावधा॰
रितेकथंभावाकांक्षायांअग्निहोत्रेतिकर्तव्यतेवज्जुहोतिचोदनालिंगकातिदेशात्संबंध्यते· प्रयोजनंतुपूर्वपक्षेनैयमिकहोमव्यतिरिक्तमनियतकालंदधिसाधन
कंहोमांतरंदर्विहोमत्वादपूर्वंसकृदेवकर्तव्यं· सिद्धांतेतुसायंप्रातराहुत्योरेवदधिप्रयोक्तव्यमिति· ११ समेषुकर्मयुक्तंस्यात्· पूर्वाधिकरणापवादोयं· त्रिवृद
ग्निष्टुदग्निष्टोमसंस्थाकः· ग्निष्टोमसाम्नस्थवायव्यास्वेकविंशमग्निष्टोमसामकृत्वाब्रह्मवर्चसकामोयजेतेत्यग्निष्टुतंप्रकृत्य· वारवंतीयमग्निष्टोमसामकार्यमितिचतु
र्णांविधायपुनराम्नायते· एतस्यैवरेवतीषुवारवंतीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेतेति· तत्रकिंगुणविशिष्टंयागांतरंकिंवापूर्वस्यैवगुणात्फलमितिसं
शयेपूर्वाधिकरणन्यायेनगुणात्फलमितिप्राप्तं· तथाहि· रेवतीवारवंतीयसंबंधव्याप्तेविधौ· श्रूयतेफलमत्रापिप्रयोगोतोनविधीयते· नचैवंरेवतीवारवंतीयसंबं
धोत्पत्तिविधानात्तस्यचफलेप्रतिविधानान्यत्परत्वात्तल्लक्षणोवाक्यभेदइतिवाच्यं· रेवतीषुवारवंतीयंकृत्वेतिकृत्वाशब्देनैवसंबंधेनिष्पादितेयजतेक्षपरेणलि॰
ङ्गफलोद्देशेनविधानात्· एवंचसतिविपरिवृत्तिप्राप्तोयजिः· प्रकृतार्थावलंबीचएतच्छब्दः· तस्मात्पराषष्ठी· प्रकरणप्राप्तमाश्रयाश्रयिसंबंधंवदंती· प्रमाण
भावादेवाश्रयांतरसंबंधात्तन्निरासप्रवृत्तएवकारः· पूर्वोदाहृतेनवचनांतरेणप्राप्तमग्निष्टोमसामसंबंधिवारवंतीयंचेत्यादिसर्वंनित्यप्रयोगमनूद्यते· कर्मांतरपक्षे राम
तुमत्वर्थविधेयंस्यात्· तच्चनयुक्तं· आहच· एकशक्तिस्वभावेनसर्वत्वविधायकः· स्वल्पार्थविधिसंबंधेनानेकार्थविधिस्तमइति· तस्माद्रेवत्याधारवारवंतीयंतत्संबंधो १५
वाफलार्थंविधीयतइतिप्राप्तेब्रूमः· प्रकृतंकर्मगृह्णातिफलायविहितोगुणः· यत्रगुणात्कामोयागःसाम्ना· तत्साध्यते· कारकभावापत्तिर्हितदाश्रयत्वं· तदपिप्रकर

णात्साम्नमनुवदितव्यं· वाक्येनास्य संबंधकरणे वाक्यभेदापत्तेः· नचेह दशहोमइव वारवंतीयसाम्नायागः शक्यो निर्वर्तयितुं· अद्रव्यदेवतात्मकत्वात्साम्नः· यत्तु तत्सा
ध्यत्वयोग्यं स्तोत्रं न तस्य प्रकरणमस्ति· अग्निष्टुति स्तोत्राणामातिदेशिकत्वात्· आह च· स्तोत्रसाधनभूतत्वं साम्नो योग्यतयास्थितं· स्तोत्रं तु प्रकृतं नास्तीत्यास्य योगो न घटीय
ते· नचायमानर्थक्यतदंगन्यायस्य विषयः· यो हि यदंगत्वेन चोद्यते स तत्र साक्षादसंभवन्नन्यांगे निविशते· संभवति ह्यंगद्वारेणाप्युपकारकत्वं· न त्वास्य यत्वं संगद्वारेण सं
भवति· नह्यंगे कारकीभावात्प्रधाने कारकत्वं· आह च· तत्रामीक्षेत्र कल्प्येत यदंगत्वेन चोदितं· प्राधान्यावस्थितं यत्तु तदंगं नोपसर्पतीति· किंच· साम्नो गीतिरूपक्रियात्वात् स्तो
त्रयापेक्षैव नास्ति· यागास्त्विव· आह च· आत्मानाद्यक्रियारूपैर्गुणैराश्रीयते क्रिया· वारवंतीयगीतेस्तु क्रियया किं प्रयोजनं· तथा· फलाय विहितं साम स्वांगं त्वं रूपमात्रतः·
वेदस्याध्यायमेवैकमुत्पत्त्यर्थमपेक्षतेइति· तस्माद्गुणफलसंबंधे यजेतेत्यग्निष्टोमसामेति चानर्थकं स्यात्· अप्राप्तस्यानुवादासंभवात्· विधाने च वाक्यभेदात्· तस्माद्दपूर्वो
यागः फले विधीयते· कृत्वाशब्दकल्पितरेवतीवारवंतीयसंबंधविशिष्टः· तत्र साम्नः प्रकृतितोऽग्निष्टोमस्तोत्रस्थाने प्राप्तेस्तद्व्यवहारेव तत्प्रापितस्थाना भवंति· तेनाग्निष्टोम
सामेत्यनुवादः· एतच्छब्दोपात्तधर्मलक्षणायानुवादः· न चानुवादे लक्षणादोषः· यद्वा· प्रस्तूयमानापूर्वयागमुख्यएव· अथैष ज्योतिरितिवत्· रेवतीषु वारवंतीयं कृत्वा पशुका
मो यजेतेत्येतावन्मात्रं तु विधीयतइति लाघवमेकवाक्यत्वं च· आह च· कृत्वाशब्दार्थमेवैकं गृह्णीते भावनोत्तरा· सोपि स्वगोचरप्राप्तं ग्रहीष्यति विशेषणं· न चैव क्रतुनाप्र
प्तात्क्रमग्रहणे कृते· क्रमप्रस्थानेन साम्नै रेवतीस्थानकल्पनेति· १२ सौभरे पुरुषश्रुतेर्निधनकामसंयोगः· ज्योतिष्टोमे स्तोत्रं प्रकृत्य यो वृष्टिकामो योन्ना
द्यकामो यः स्वर्गकामः स सौभरेण स्तुवीतेति स्तोत्राश्रितं सौभरं फलत्रयसाधनत्वेनाम्नातं· यद्यपि सौभरस्य साम्नो गीत्यात्मकक्रियात्वाद्वारवंतीयवन्नाश्रयापेक्षा
तथापि स्तुवीतेत्यनेन एकवाक्यत्वात्साधनभूतस्यैव फले विधानं· न याहि· सौभरेणेत्येकपदोपात्तं सौभरविशिष्टं करणकारकं फले विधीयते· फलभावना

करणत्वं तु यागादिवद्देवसमभिव्याहारान्नास्ति हंतनु विभक्त्या· कारणं च क्रियापेक्षमिति युक्तं स्वरूपतोऽपि समस्तं वा नरवंती मंतु द्वितीयांतत्वात्करणभूतमवगम्यते· किंतु क
मीभूतं· न च स्तोत्रयागे वा सामन्तः कर्मत्वं संभवति· अतो न तदपेक्षेति वैषम्यं· तदेवं फलत्रयसाधनं सोमरसरूप आम्नाते· ह्रीषितिरष्टिकामायनिधनं कुर्यात् उर्गित्पन्नाद्यकामा
य ऊ इति स्वर्गकामायेति· तत्र संशयः· किं ह्रीषादयः फले विधीयंते उत सोमरस्यैव तत्फलं साधयतस्तत्र निधनं नियम्यत इति· तत्र· रष्टिकामपदेनात्र रूक्षत्वेवाभिहितः पुमान्· साध
नापेक्षिणस्तस्य ह्रीषादिपदसंगतिः· पुरुषस्य हि श्रोतत्वात्तादर्थ्यमेव ह्रीषादीनां चतुर्थ्याविज्ञायते· तच्छेषता च तदभिलाषितफलसाधनत्वापेक्षि फलांतरार्थत्वमेव ह्रीषादीनां·१
अन्यथा हि वृष्टिकामादिशब्दैः सोमरसत्वोत· तस्मात् ह्रीषादयः फलांतरार्था इति प्राप्ते ब्रूमः· सोमस्य समस्तस्य यः कामो विहितः पुरा· नियंतुं निधनं तस्य मण्वाय मनूद्यते· वृष्ट्या
दीनि हि पूर्वोक्तान्येव विपरिवर्तमानानि स्वस्थाभिज्ञायंत इति न फलांतरावगमः· किं च· ह्रीषितिशब्दमात्रे फलाय विहिते आश्रयो दुर्लभः· यदि हि सोमरसप्रकृतं· न तच्छ्रौत्वात् आश्रयेष
तिपत्तुं· समस्तं हि सामसोमरं· तच्च बहुत्वात् साध्यं· न ह्रीषमात्रेणासुसाधं· यच्च साधयितुं शक्यते निधनं मतस्य प्रकरणमस्ति· यदि तु वाक्यादेवाश्रयदानं ततो वाक्यभेदः· तथा निध
नमात्रानुवादेन ह्रीषादिसंबंधे सर्वसामसंगः· तस्मान्निधनत्वेनानियतप्राप्ता ह्रीषादयो नियम्यंते· न च वृष्टिकामशब्दस्य सोमरसत्वसकलत्वसंगः· ह्रीषादयो हि सोमरसांगभूतास्ते
स्तद्द्वारेण वृष्टिकामादीनां पुरुषाणामपि स्वनियमेनं शेषभूताः प्राप्तास्तानेव प्रतियथाप्राप्तरूपान्नियम्यंते· दृष्टं हि फलकरणांगस्यापि पुरुषशेषत्वं· तथा च श्रूयते· वासिष्ठा
दीनां नाराशंसो द्वितीय इति· तस्मात्तल्लक्षणा· भाष्यवार्त्तिकयोस्तु साधनद्वारेण तादर्थ्यं· न तु साक्षादित्येतावन्मात्रेण लक्षणोक्तं· एवं स्थितेयथाप्राप्तानामेव नियम इति राम
तन्निधनसहित एव सोमरविशेषस्तत्तत्फलार्थत्वेन प्रयोक्तव्यः· न तु शाखांतरगते सोमरे शाखांतरीयं निधनं प्रयोक्तव्यं· तस्मात्फलांतरार्थेन नैव ह्रीषादयो गुणाः विधीयते·१
नियम्यंते यथाप्राप्तं तु सोमरे· १३ इति श्रीमीमांसाशास्त्रसर्वस्वे द्वितीयस्याध्यायस्य द्वितीयः पादः ४ गुणस्त्वकृतसंयोगात्कर्मांतरं प्रयोजयेत्संयोगस्याशेषभूतत्वा १६

ता ज्योतिष्टोमे प्रथमं बृहद्रथंतरे वैकल्पिके पृथक् पृष्ठसाधनत्वेन चोदिते · ततः पुनः श्रूयते · यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् · यदि बृहत्सामा शुक्रा
ग्रानिति · तत्र किं रथंतरसामा बृहत्सामेति च ज्योतिष्टोमात् कर्मान्तरं विधीयते किं वा ज्योतिष्टोम एव रथंतरेण बृहता चावच्छिन्नो ग्रहाग्रताविशेषं प्रति निमित्तत्वेनानुकीर्त्यत इति
संशये · कर्मान्तरमिति प्राप्तं · तथा हि · समासः सति सामर्थ्ये तच्चापीष्टं विशेषणे । विशेषणं व्यवच्छेत्तृ ज्योतिष्टोमे च नास्ति तत्र संत्यन्यान्यपि सामानि गायत्रादीनि तत्र हि · न चाव्य
वच्छेदकत्वेपि सत्त्वेनैव विशेषकत्वं · कृत्स्नक्रतुव्याप्तिविरहात् · तस्मात् पूर्वं तावत् संभवी रथंतरसामत्वेनाप्रगुणः कर्मान्तरं कल्पयति · यदि शब्दस्तु निपातत्वादनर्थकः · तद्व्याख्याहारेण
वा यदि रोचते तिथ्योऽन्यः यद्वा · व्यत्ययेन संबंधः · यदि गृह्णीयादिति · कामश्रवेदनेव लिङ् । इच्छाविषयीभूतग्राहाग्रत्वविशिष्टं कर्म सोमः स्यादिति लिङा च विधीयते यद्वा · सोमः स्या
दिति हेतौ लिङ् । गृह्णीयादिति विधौ · रथंतरसाम्नि सोमे हेतुकानैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति · अक्रियमाणस्य हेतुत्वासंभवादर्थात् सोमविधिः · अथवा · हेतुमति गृह्णीयादिति · सो
मः स्यादिति विधौ · हेतुमत्त्वसिद्ध्यं च हेतुत्वं संनिधानात् सोमस्यैव · एवं च ग्रहाग्रताविशेषरूपफलकारणभूतः सोमयागः कर्तव्य इति · आह च · यदि शब्दपरित्यागेन च व्याहारकल्प
ना । अव्यवधानेन संबंधो हेतुमतो वा लिङ् इति · किं च · प्रातःसवने ग्रहाग्रता भवति रथंतरं तु माध्यंदिने · न चोत्तरभाविनो निमित्तता संभवति · तस्मात् कर्मान्तरमिति प्राप्तेऽभिधीयते · यदि श
ब्दस्वरसात् प्रकरणाच्च ज्योतिष्टोमस्याभिधानं · न च रथंतरस्य विशेषणत्वासंभवः । तस्य पाक्षिकतया असत्त्वाद् उदासेन सत्त्वेनैव विशेषकत्वात् · यद्धि तु सामान्तरमेव व्यवच्छेत्तव्यमित्या
ग्रहः · तथापि वैकल्पिकयोर्बृहद्रथंतरयोरेव परस्परविरोधिनोर्व्यवच्छेदोऽस्तु · न त्वविरोधिनां सामान्तराणां · न हि नीलमुत्पलमित्युक्ते पीतादय इव दैर्घ्यादयोऽपि व्यवच्छिद्यन्ते · अ
स्ति चानपेक्षस्यैव पृष्ठस्तोत्रसाधनत्वेन ज्योतिष्टोमान्वयः · तस्मात् हि शिष्टः क्रतुर्निमित्तं · बहुव्रीहिणा तस्यैव प्राधान्येनाभिधानाच्च · अक्तवा विशेषणमेव निमित्तं · प्रथमप्रती
तत्वात् · अनित्यत्वात् · आवश्यकत्वाच्चेति · न यदि शब्दपरित्यागादिकल्प्यं · न चेह निमित्तं स्वरूपेणोपकरोति किं तु ज्ञायमानत्वेन · अस्ति च वैकल्पिकानां क्रतुप्रक्रम एवावधारण

रा·सू·
१७
17

मितिसर्वमवदातं ॥ १ ॥ अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ राजसूयप्रकरणे आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणेत्यादिभिरैन्द्र्यदेवतासंयोगैरवेष्टिंनामेष्टिं विधाय श्रूयते यदि
ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत् यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमिति । तत्र किं राजसूयमध्यस्थाया एवेष्टेर्वर्णविशेषसंबंधेनाप्तमेवनि-
मित्तत्वेनोद्दिश्यते उतैवमिति किं मध्यनिधानविशेषादिविधीयते उताप्राप्तमेव ब्राह्मणादिसंबद्धप्रयोगान्तरमेव विधीयत इति संशयः । तत्र पूर्वाधिकरणन्यायेन निमित्तार्थानि ब्रा-
ह्मणादिश्रवणानीति प्राप्ते । राजसूयाधिकारो हि वर्णत्रयसाधारणः । न च राज्ञोपपदश्रवणात्क्षत्रियमात्रपरतेति वाच्यं । राजशब्दस्य राज्ययोगनिमित्तकतया त्रैवर्णिकसाधारण्या-
त् । अह च । कर्तारो राज्यस्य राजेति सर्वलोकेषु गीयते । महाविषयत्वे चैवं च शास्त्रस्यापि भविष्यतीति । एवं च यदि शब्दस्वारस्यसिद्धा निमित्तत्वप्रतीतिरपि न बाधनीया । तस्मात्प्राप्ताना-
मेव ब्राह्मणादीनां निमित्तार्थश्रवणमिति प्राप्ते ब्रूमः । क्रतुसंबंध एवायं ब्राह्मणादेर्विधीयते । अप्राप्तत्वात् । न राजा हि राज्ययोगात्प्रतीयते । राजानमभिषेचयेदिति ह्यभिषेकविधौ रा-
ज्ययोगात्प्रागेव क्षत्रियमात्रे राजशब्दो वेदे प्रयुक्तः । तेन रूढमेव राजपदं । न च मा विसंज्ञाविज्ञानं । भूतत्वेनैवोपपद्यमानत्वात् । यदि शब्दस्य निपातत्वाद्यथाकथंचिद्दुःखाध्याहारा-
दिना गुणकारीत्यानेयः । न च राज्यस्य कर्तेत्यर्थे राजशब्दो व्युत्पादितः । किंतु राज्ञः कर्मेत्यर्थे प्यत्रं तत्पुरोहितादिभ्यो यगिति यकं विधाय राज्यशब्दो व्युत्पादितः । दृश्यते च क्षत्रियजातिमात्रे
प्यांध्रद्रविडादीनां राजशब्दप्रयोगः । शास्त्रव्यवहारे च दृष्टार्थत्वात् म्लेच्छानामपि प्रामाण्यमिति पिकनेमाधिकरणे प्रतिपादितं बर्हिराज्यादिशब्देषु च एकदेशेऽपि जातिनिमित्तत्वेल-
भ्यमाने निमित्तान्तरं न कल्पनीयमिति निर्णीतं । प्रजापालनादिकर्तरि शूद्रादौ राजशब्दप्रयोगस्तु गौणः । अनेकार्थत्वस्यान्याय्यत्वात् । तस्मात्क्षत्रियमात्रपरराजोपपदवशा-
त्तन्मात्राधिकारको राजसूयः । तदन्तर्गतायां चावेष्टौ ब्राह्मणादेः प्राप्त्यभावात् ब्राह्मणादिकर्तृकप्रयोगान्तरविधिरेवायमिति स्थितं । ननु एतया अन्नाद्यकामं याजयेदिति वर्ण-
विशेषासंबद्धेन प्रयोगवचनेन वर्णत्रयस्यापि प्राप्तेर्निमित्तार्थश्रवणं किं न स्यादिति चेत् न । निर्ज्ञातक्षत्रियकर्तृकायाः कर्त्रन्तरवचनान्तरेणाविधीयमानायाः पृथक्प्रयोगका-

राम
१७

द्दाणाभावात्। राजसूयमध्यस्थाया एवसंयोगादृष्ट्येष्ट्यत्वकन्यायेन साधारणत्वात्तदङ्गं। आत्याग्निकं वा नायं फलमिति निहिषात्वं यथा ऽध्ययनाधानयोर्नियोगेनैव त्रैवर्णिककर्तृ
कत्वात्तदधीनसिद्धीनाश्चार्थिमात्रसंबन्धानामपि कर्मणामपशूद्रविषयत्वं यथा वा राजकर्तृकत्ववशेन मोक्षविशेषः तत्र यदि ब्राह्मणमित्यनेन प्रयोगान्तरे विहितेष्वन
यात्राद्यकाममित्यनेन तत्रैव फलं [illegible]र्प्यते। आह च क्रतुमध्यप्रयोगो हि स्वाराज्येनैव पूरितः साकाङ्क्षस्थितरसस्मात्तस्यैव फलसंगतिरिति। २ आधाने सर्वशेषत्वा
त्। वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति श्रूयते। तथा वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति। तत्र किं ब्राह्मणादीनां आधानोप
नयनयोः शास्त्रानां वसन्तादिकालं प्रति निमित्तार्थानि श्रवणानि उत साधकानीति संशयः। तत्र विनानैवाग्निविद्याभ्यां क्रत्वनुष्ठानसंभवः। अग्निविद्ये न च स्यातामा
धानोपनयनाभ्यां विना। न हि गुरुमनुपेत्य विद्या लभ्यते। नाप्याधानमन्तरेणाहवनीयादयः। न देवोपायत्वात्। न कं गार्हपत्यमादधाति दिवाऽऽहवनीयमित्यादिगुणवाक्या
लोचनेन द्योतत्सायते नूनमाधानाधीनमाहवनीयत्वादीति। वसन्तादिवाक्येष्वाधानविधिरिति पक्षेऽपि हि एष एव गतिः। वसन्तादिवाक्येष्वाहवनीयादिशब्दाभावेन गुणवा
क्यालोचनेनैव तदवगमात्। अतोऽग्निविद्यासाध्यैः क्रतुभिस्तदुपायभूतयोरुपनयनाधानयोराक्षेपतः प्राप्तिः। अथवा य एवं विद्वानग्निमाधत्ते इति सर्ववर्णानामाधानविधा
यकं गुणानपहत्य विधिशक्तिकं वचनमस्ति। वसन्तादिविधयस्तु गुणापहृतशक्तिकत्वात् ब्राह्मणादिनिमित्तकं कालमात्रं विदधति। आह च सामर्थ्याच्छिन्नमाधानं स
न्यवचनेन वा। तस्माद्वर्णविशेषाणां निमित्तार्थाः पुनः श्रुतिरिति। एवं प्राप्ते ब्रूमहे। यत्परविधिसद्भावात् लभ्यते आनुमानिकः। साधकत्वमतो नार्थवर्तमानापदेशयोः। न ताव
न्नित्यमर्थस्य साधकत्वं। क्रतुविधयो हि साग्निविद्यामात्रसाध्याः। अग्न्ययस्त्वध्याधानसाध्यास्तु याधिपनतेनैव निष्पाद्याः। अन्येन निष्पादितानां क्रयादिभिरिव प्रयोगाग्नि
संभवात्। आह च। सत्यं प्रथममाधानादुत्पद्यन्तेऽग्नयस्तथा। पश्चात्तु नहि वन्तेषां नोपायान्तरवारणमिति। तथा विद्यापि गुरुकनिरीक्षणाद्युपायसंभवान्नैकान्ततः उपनयन

शा॰ माक्षिपति· किंच· अन्यस्तद्वचनेनैवान्यथानुपपत्तिस्तयेसत्यर्थापत्तिलभ्यश्रुतिपरिग्रहोसंगतः· यएवंविद्वान्नित्यपिवर्तमानापदेशः प्रत्यक्षायांलिङिः लभ्यमानायांनविधि
१८ शक्तिंलभते· किंतुसंभारविधिंस्तौति· तस्माद्दसंगतादिवाक्यानिज्ञानस्तणवसंतादिविशिष्टस्याधास्योपनयनस्यचविधायकानीति· एवंचपूर्वद्वयपूर्वत्रोत्पत्तिशिष्टगुणाविरो
धादुत्तरउत्तरेगुणः कर्मांतरंकल्पयति· तेनत्रीण्यपाधानामिस्वार्थाएववाक्यस्यः आत्मनेपदनिर्देशात्· शूद्रस्यवाप्राप्तिः रितिसिद्धांति· पूर्वपक्षेतुसर्वंविपरीतंस्यात्· ३
18 अयनेषुचोदनांतरंसंज्ञोपबंधात्· दर्शपूर्णमासयोः श्रूयते· दाक्षायणयज्ञेनस्वर्गकामोयजेत· तथासाकंप्रस्थायीयेनयजेतपशुकामइति· तत्रकिंकर्मांतरविधिः उतदर्श
पूर्णमासयोरेवगुणात्फलमितिसंशयेकर्मांतरमितिप्राप्ते· तथाहि· दाक्षायणादिसंज्ञायुक्तस्यगुणस्याप्रसिद्धत्वादुद्भिदादिवत्सामानाधिकरण्येननामत्वं· नाम्नाचभेदोज्योति
रादिवत्· अपिच· विधेयांतराभावेनफलोद्देशेनेहकर्मण एवविधेयत्वादभ्यासादपिभेदः· एवंप्राप्तेब्रूमः· स्यादेवंनामधेयत्वेगुणस्यात्रविधीयते· फलाय· साकंप्रस्थानमात्र
निष्ठत्वभिन्नत्वा· नामत्वेहिसंज्ञालक्षणोभ्यासलक्षणोवाकर्मभेदः स्यात्· अयंतुगुणविधिः· यद्यपिनलोकप्रसिद्धोगुणः तथापिदाक्षायणादवयवव्युत्पत्त्याचावृत्तिसहप्र
स्थानलक्षणगुणवचनत्वमनयोरवगम्यते· त्रिंशतंवर्षाणिदर्शपूर्णमासाभ्यांयजेत· यदिदाक्षायणयाजीस्यादथोअपिपंचदशवर्षाणियजेत· अत्रह्येवमासंपन्नंपद्यते
·हिताग्निःपौर्णमासोहस्यमावास्येतिवाक्यशेषः· दक्षः शीघ्रकारीयजमानः· तदीयाऋत्विजोदाक्षाः· तेषामयनंपुनःपुनःप्रयोगः· सचयज्ञाश्रितत्वाद्दाक्षायणयज्ञइत्युच्य
ते· साकंप्रस्थाय्येतुसांनाय्यमनवदायकुंभीभ्यामेवसाकं· प्रस्थीयतइतिगुणवचनत्वनिर्णयः· अतः प्रकृतयागाश्रितोगुणोफलायविधीयतेदध्यादिवत्· इयानेवभेदः· द
ध्यादेरर्थोत्पत्तिः निरूढत्वान्नानामधेयत्वं· दाक्षायणादेस्तुहोमाहीत्यादिनावाक्यशेषबलेनदार्शपौर्णमासिकगुणवचनत्वावगमादिति· ४ संस्कारस्याप्रकरणेकर्मशब्दत्वात् राम
॰वायव्यंश्वेतमालभेत· मृत्तिकामः· सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामः· इत्यनारभ्याधीतं· तथा दर्शपूर्णमासयोः· इमामालभेत· चतुरोमुष्टीन्निर्वपेदिति· तत्रकिंदार्शपूर्णमा १८

सिकयोरीषालंभन्निर्वापयोश्वेतचरुगुणौ विधीयेते किंवा यावदुक्तकर्मांतरमाहोस्वित्यागौ विधीयेते इति संशयः नचविधिगौरवान्नकर्मांतरं यागस्य श्रुतः नचासति यागे
देवतात्वं किंतु सर्ववस्तूनां वायुसंबंधात्कथंचिदीषा याएवायव्यमित्यनुवादः तेजोदैवत्यत्वसामान्याच्चाग्नेयस्यैव सौर्यमित्यनुवादः अतो दार्शपौर्णमासिकयोरालंभनिर्वा
पयोः गुणौ विधीयेते यदालभेतत च्छेतमिति सामान्येन पुंसकं यन्निर्वपेत्तं चरुमिति चरुशब्दश्चनिरूढ्चर्वधिकरणपूर्वपक्षन्यायेन स्थालीवचनः सप्तम्यर्थे हि द्वितीया स्थाल्यां
निर्वपेदित्यर्थः भूतिकामब्रह्मवर्चसकामशब्दौ तु सार्वकाम्यप्राप्तानुवादाविति चेन्न गुरुं नित्यवच्छ्रुतयोः फलपदयोः पाक्षिकानुवादत्वायोगात् आनर्थक्यापाताच्च तस्मा
त्गुणफलविशिष्टं कर्मांतरं वा यावदुक्तं विधीयते देवतापदं तु प्राग्वदेव कथंचिन्नेयमिति प्राप्ते ब्रूमः देवतापदवैयर्थ्यं यावदुक्तविधौ भवेत् तेन तत्कल्पितो यागो विधीयेता
अतोपि सन् नहि यद्देवत्यस्तत्पठितं तद्देवशब्दः सामर्थ्यस्यापि शब्दकल्पकत्वाद्यावदुक्तत्वात् अतो द्रव्यदेवतासंबंधकल्पितो यागो विधीयते आलंभस्य चोदकप्राप्तेरनूद्यते अ
ग्नीषोमीयेपशुनेनैव यजिमत्वसिद्धिः पशुसोमाधिकरणे हि किमनुवादकत्वमुत विधायकत्वमित्येव विचारितं सिद्धे तु विधायकत्वे किं तद्विधेयमित्याकांक्षायामेतदधिक
रणाधीनो यागत्वनिर्णय इति न पौनरुक्त्यं ५ विशये प्रायदर्शनात् १ अग्निहोत्रदोहाधिकारे श्रुतं वत्समालभेतेति अत्रापि पूर्ववद्यागविधिरिति मत्वानंगतिरुक्तस्सु
च्यते द्रव्यदेवतासंबंधात्पयानुपपत्त्या हि पूर्वयजिः कल्पितः न चेह सास्ति नवत्साणीद्रव्यकालंभनत्वसामान्याद्यागसिद्धिः अप्रयोजकत्वात् लौकिकालंभे व्यभिचाराच्च आ
लभतिस्तु स्पर्शमात्रवाची तस्मात्स्पर्शमात्रं वत्ससंस्कारः विधीयते एवं च दोहनादिसंस्कारकर्मप्रायदर्शनमप्युपपद्यते दृष्टार्थतालाभश्च गोप्रस्नवनहेतुत्वात् वत्सनि
कांता हि पशव इति वत्सप्रियत्वस्य हेतुवन्निगदार्थवादोपि एवं समगच्छते ६ संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् चरुमुपदधाति बृहस्पतेर्वा एतदन्नं यन्नीवाराः इत्य
ग्नौ श्रूयते तत्र किं चरोरुपधानमात्रमुत याग इति संशये याग इति प्राप्ते आर्थवादिकद्रव्यदेवतासंबंधात् तैत्तिरीयकाणां तु बार्हस्पत्यो भवतीति तद्धितेनैव वाक्यशेषे देवता

शा॰दी॰ त्वमुक्तं तस्मात्प्राधान्यार्थस्य रूढ्युपधानं तु लिङ्गक्रमादिगत्या आग्नेयेनोपयुक्तस्य चरोः प्रतिपत्तिः एवं प्राप्ते ब्रूमः विध्युद्देशापेक्षितो हि विशेषो वाक्यशेषाद्गृह्यते न ल
१९ नपेक्षितः चरुस्तु यागाङ्गभूताग्निधारणार्थस्थूलनिर्वृत्तिविशेषत्वेन शास्त्रविहितः नार्थान्तरमपेक्षते तेनेत्तिरीमवाक्यमपि वर्तमानापदेशत्वान्न देवताविधायकं न चोपधा
नस्य यागाङ्गदेवतापेक्षा येनो वाक्यशेषगता देवता गृह्येत अतोऽर्थवादमात्रं न चेयं प्रतिपत्तिः प्रथमं प्रयोजनवत्त्वानवगमात् न च द्वितीया निर्देशविरोधः उपधा
नसंस्कृतस्यैव चरोः स्थूलनिर्वर्तकत्वात् उपधानं प्रति गुणभावात् अध्ययनसंस्कृतस्य स्वाध्यायस्य तन्त्र्यमस्य योक्तकर्मत्ववदुपपत्तेः ७ पात्नीवते तु पूर्ववत्त्वा
19 द्वन्द्वेदः त्वाष्ट्रं पात्नीवतमालभेतेति श्रुतं पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति श्रूयते तत्र किं पर्यग्निकरणान्तो यागविधिः उतात्तसंस्थयागविधिरिति संशये या
गविधिरिति प्राप्ते तथा हि पर्यग्निकृतं पात्नीवतं कुर्यादिति संबन्धः न तु पर्यग्निकृतमुत्सृजन्तीति व्यवहितान्वयापत्तेः न च पात्नीवतशब्देन पूर्वयागप्रत्यभि
ज्ञानं त्वष्टा हि पत्नीनामत्र देवता न तु केवलः पत्नीवान् यथा आग्नेयमित्यग्नीषोमीयस्याग्रहणं तथेहापि किं च पूर्वत्र विधेयो गुण इह दुर्लभः न हि पर्यग्निक
रणं विधेयं चोदकप्राप्तत्वात् नाप्युत्सर्गः तस्योत्पत्तिवाक्यसिद्धत्वात् पर्यग्निकरणविशिष्टपात्नीवतोद्देशेनोत्सर्गविधौ विशिष्टानुवादाद्वाक्यभेदः न च पर्यग्नि
कृतमुत्सृजन्तीति क्रमः तस्यापि चोदकप्राप्तेः न च पर्यग्निकरणान्तो यागकलापः तस्यापि सिद्धेः नाप्युत्तरयागपरिसंख्या त्रिदोषत्वात् तस्मात्कर्मान्तरमिति प्राप्ते
अभिधीयते नात्राग्नेयवदसामर्थ्यं उत्पत्तिवाक्ये हि त्वाष्ट्रं पात्नीवतमिति प्रत्येकमुत्पन्नस्याहितः प्रत्येकमेव देवतालिङ्गमयति न चैवं विकल्पापत्तिः युगपदेकेन वा
क्येन विधानात् अतो द्विरुक्तोऽपि द्व्योर्मात्रयोर्यथा दिक्क्रमात् इति शक्यते वक्तुं तथा पात्नीवतमपीति न कर्मान्तरत्वं युक्तं अतः उत्सृजन्तीत्यपूर्वयागमनूद्य पर्यग्निक राम
रणान्तो यागकलापविधिः तेन च क्रतूपकारेण निराकाङ्क्षः प्रयोगवचनो गृह्णीयमेधीयवन्नातिदेशमपेक्षते उत्तरांगाविच्छेदार्थमिदं वाक्यमिति तु फलेनोच्यते पर्य १९

ग्निकाशब्दस्य याकृतपर्यग्निकरणावस्थावचनस्तदंतोगकलापं गमयति· नहिसर्वांगोपसंहृतेद्वियमवस्था भवति· नचाविशिष्टानुवाददोषः· याकृतोत्सर्गा
नुवादेनांगारीतिविधोपात्तीवतशब्दस्यनित्यानुवादत्वात्· ७ अस्य्यत्वाकेवलेकर्मशेषः स्यात्· । एषवैहविषाहविर्यजतेयोदाभ्यंगृहीत्वासोमायज
तेपरावाएतस्यायुः प्राणएतियोंशुंगृह्णातीत्यनारभ्यश्रुतं· तत्रकिंज्योतिष्टोमेग्रहणविधिरुतयागांतरविधिरितिसंशयः· तत्रग्रहणस्यसंस्कारत्वादेवधा
तादिवन्नामधेयानर्हत्वाद्यागनामधेयमदाभ्यंयजतइति· नामचग्रहत्वादपिभेदकं· किमुतागहृतात्ज्योतिष्टोमात्· अंशौनुयद्यपियजतिर्नश्रुतः· तथा
पिसंज्ञैवैककर्मांतरत्वेगृह्णातिचोदनासामान्यात्ज्योतिष्टोमग्रहतिकत्वेचातदीयविह्यंतयागेईश्वरदेवतासंबंधाद्यागोभविष्यति· तस्माद्यागांतरेइत्येवं
प्राप्तेब्रूमः· संस्काराणांतनामानिवार्यंतराज्जशासनात्· आनंतर्यादतः स्यातांग्रहयोरेवनामनी· अदाभ्येस्तूयमानोपिगुणसंक्रांतशक्तिना· विधिनानविधातुर्यो
यागस्तेननिमियते· अंशौत्वश्रुतएवेतिविधेयौकेवलौग्रहौ· तयोर्गृह्णात्युपस्थानात्ज्योतिष्टोमेनसंगतिः· अथवातैत्तिरीयाणामनयोर्विनियोजकं· अस्तिप्रकरणे
वाक्यंतेनतादर्थ्यमेतयोः· यथाहिसाप्तदश्यस्यानारभ्यवादेनसामिधेनीभिर्बाधितयोत्पत्तिः प्राकरणिकेस्यविनियोगः· तथेहापिबोध्यं· ८ अग्नेस्तुलिंगदर्श
नात्क्रतुशब्दःप्रतीयते· यएवंविद्वानग्निंचिनुतइतिश्रुतं· तथाअथातोग्निमग्निष्टोमेनानुयजंतितमुक्थ्येनतमतिरात्रेणेत्यादि· तत्रसंशयः· अग्निंचिनुतइतिकिं
यागविधिःउतचयनमेवस्वतंत्रं किंवाज्योतिष्टोमादिषुगुणोविधीयतइति· तत्रअग्निशब्दस्यतत्प्रख्यन्यायेननामधेयत्वात्स्वतंत्रयागकर्मांतरेऽवधारितेकीदृशंतत्क
र्मेत्याकांक्षायांअथातोग्निमितिसंस्थाविधिपरेवाक्येयजिनानुवादाद्धृत्पत्तौयागवचनोग्निशब्दइतिगम्यते· नेनहिअग्निष्टोमसंस्थेनयागेनाग्निमनुयजतीत्युच्य
ते· यदिचाग्नियागस्तदाप्रावनुप्रवृत्तंशक्यते· यथादेवदत्तमनुगच्छतीति· यदिदेवदत्तोपिगच्छतितदैवानुगमनमुपपद्यते· एवमनुयजनमपीतिमत्वायागसिद्धिरि

शब्दा· २०

20

तिप्राप्तेऽभिधीयते· अत्यंतरूढिशब्दत्वाद्यागशब्दादिभिर्विना· ज्वलनं न परित्यज्यत्यग्निः प्रतीयते· यत्तु तत्र लक्षणत्वमस्तीति तत्तदा स्यात् यदि क्रत्वंगत्वेनाग्निर्वि
धीयेत· स तु प्राप्तक्रत्वंगभाव एव चयनसंस्कार्यतया श्रूयते· न च तादर्थ्येन कुतश्चित्प्राप्त इति तत्र लक्षणाशक्त्याभावः· तस्मादग्निशब्दस्य ज्वलनपरत्वान्न चिनोतेश्च या
गाभिधायकत्वात् चयनेनाग्निं संस्कुर्यादिति वाक्यार्थः· संस्कृतस्य च अस्याग्नेरग्निमित्यादिभिः क्रतुसंबंधः· अनुयजति शब्दः कथमिति चेत्· उच्यते· कर्मप्रवचनी
ययुक्ते द्वितीया· तेनाग्निचयनमनु अग्निष्टोमादिभिर्यष्टव्यं इति क्रत्वंगभावार्थमेव एतानि वचनानि· न चावश्यं तुल्यजातीययोरेव पौर्वापर्यमिति नियमः· पाक
मनु स्रुंक्त इति दर्शनात्· यत्र हि कर्ममात्रमुपात्तं न तु क्रियांतरं· यथा देवदत्तं यज्ञदत्तोऽनुगच्छतीति तत्र तुल्यजातीयेन क्रियाकल्पनं इत्युचितं· इह तु अग्निशब्दस्य प्रक
रणावशाच्चयनसंस्कृतवह्निपरतया संस्कारोपात्तं चयनकर्मैव विद्यत इति वैषम्यं· तस्मान्न यागविधिर्नापि स्वतंत्रं चयनं किंतु ज्योतिष्टोमादिषु गुण इति सिद्धं· चोदके
नैव प्राप्तानां विकृतिषु पुनः श्रवणस्य प्रयोजनं दशमे वक्ष्यते· १० प्रकरणांतरे प्रयोजनान्यत्वं कुंडपायिनामयने श्रूयते· मासमग्निहोत्रं जुहोति मासं दर्शपौर्ण
मास्याभ्यां यजेत इति· तत्र किं नैयमिकेऽग्निहोत्रादौ मासो विधीयते किं वा कर्मांतरमिति संशयः· तत्र अग्निहोत्रादिशब्देन पूर्वकर्मावबोधितं· न तु प्रकर्षमात्रेणाभे
दरूपं प्रपद्यते· यथैव वलभ्यां पाटलिपुत्रे वा अग्निहोत्रशब्दो नार्थांतरं प्रतिपादयति तथा प्रकरणांतरेऽपि· न हि देशभित्तश्च जुहोतिरपि नार्थांतरे वर्तते· तत्र च मासो
विधीयते· अनुपादेयत्वेऽपि तस्याप्राप्तत्वेन विधेयत्वात्· कर्म तु यद्यप्युपादीयते तथापि न विधीयते प्राप्तत्वात्· किंत्वनूद्यते· विधिनिबंधनश्च भेदो नोपादाननिबंध
नः· न च यावज्जीवकालावरुद्धे मासविध्यसंभवः· उत्पन्नशिष्टयोरुभयोः क्लृप्तबलत्वेन विकल्पोपपत्तेः· काम्यो वा प्रयोगः कालविशेषविधानात्· न च प्रकरणबाध राम
प्रसंगः· वाक्येन तद्बाधस्येष्टत्वात्· न च जुहोतीति कर्तृबहुत्वेन कर्मभेदः· यावत्प्रत्यभिज्ञानापायात्· तस्मान्न कर्मभेद इति प्राप्तेऽभिधीयते कर्मांतरमिति· तथाहि· य २०

दिशु होमाभ्यासो विधीयेत ततः पूर्वकर्मानुवादबुद्धिर्भवेत् ॰ न त्वेतदस्ति उपसदुत्तरकालत्वश्रवणात् ॰ विद्यमानाभिरुपसद्भिः कालो लक्षयितुं शक्यते ॰ न चैवे
यमिकाग्निहोत्रे ताः संति ॰ तथा च तदुत्तरकालत्वमासत्वत्रगुणद्वयविधाने वाक्यभेदादिति भाष्यकारः ॰ आचार्योक्त एवं सति गुणद्वयेदं इत्युक्तं स्यात् ॰ न तु प्रक
रणान्तरात् ॰ मासं दर्शपौर्णमासाभ्यां यजेतेत्यादावुक्तप्रकारासंभवाच्च ॰ न हि तत्राप्युपसंहृष्टताः ॰ येन वाक्यभेदः ॰ न च तत्राप्युपसद्भिः श्रितत्वे तत्स्यानुषङ्गः ॰ अग्नि
होत्रसंबंधेनैव तत्सन्नैराकांक्ष्यात् ॰ तस्मादेवं समाधेयं चेत्कर्मण्यन्यदेव ॰ अप्राप्तगोचरत्वाद्धि विधेः ॰ न चैवं मासमग्निहोत्रं जुहोतीत्यादावपि कर्मान्तरत्वप्रसंग इति वाच्यं ॰ तत्प्रक
रणवृत्तितया स्फुटतरेण प्रत्यभिज्ञानेन औत्सर्गिककर्मस्वरूपपरतामपोह्य मासादिविनियोगमात्रपरत्वावगमात् ॰ प्रकृते तु तद्बुद्धिविच्छेदादपवादा
भावेनौत्सर्गिकाग्निहोत्रकर्मस्वरूपविषयत्वस्यापनेतुमशक्यत्वात् ॰ ननु संनिधानोपनीतं चेत्कर्म नोत्पद्यते पुनः ॰ नामधेयोपनीतं तत्र गुणेनोत्पद्यतेतरां ॰ वाक्यांत
रगतमपि हि संनिधानं तु संनिधीमात्रेण प्रत्यभिज्ञायमानं न भिद्यत इति यदि ॰ तर्हि स्ववाक्यगतेनाग्निहोत्रनाम्ना उपनीयमानं न प्रत्यभिज्ञास्यत इति कुत इति चेत् ॰ ।
न ॰ एवमपि भावनाभेदानपायात् ॰ सामानाधिकरण्येन हि धात्वर्थस्यैव नामधेयं ॰ न तु भावनायाः ॰ तस्मात् भावनाभेद एव योजनान्यत्वं नाम ॰ आह च ॰ नाम्ना धात्वर्थमा
त्रं च संनिधायेत शक्तितः ॰ भावनायास्त्वनुपस्थानाद्विधमानावधार्यत इति ॰ वस्तुतस्तु ॰ धात्वर्थोऽपि भिद्यते ॰ नाम्ना माख्यातपरतंत्रत्वेन स्वाख्यातवद्विशिष्टप्रतीतिक्रमाणेषु तेषु
मासं जुहोतीति जुहोतिपदमात्रसंगततावालोच्यमानायामयमप्यस्य जुहोत्यादेः प्रत्यभिज्ञानं स्वप्रकरणेऽविपरिवर्तमानत्वात् ॰ किंच ॰ अप्रसत्वभूतो हि धात्वर्थो जुहोति
ना विधेरुपनीयते ॰ अग्निहोत्रादिपदैस्तु न तादृशस्याभिधानं ॰ किंतु द्रव्यभूतस्य लिंगसंख्यायोग्यस्य ॰ अतः प्रत्यभिज्ञाभावादिदमेव ॰ आह च ॰ धात्वर्थोऽपि यथाख्या
तेऽसत्वभूतः प्रतीयते सत्वाभिधायिना नाम्ना तादृशो नैवोपनीयत इति ॰ सर्वेषु तु यत्र ज्यत्र नाम्नामात्रोपनीतः प्रकृतयागप्रत्यभिज्ञानात् भावनामात्रभेदः ॰ चत्वारोऽभिप्र

शा॰छ॰ वाद्यत्वादौ·नह्यत्रनामविलक्षणोधातुःश्रूयते·आहच·विधीयतेभावनामात्रंधात्वर्थोनायजिक्रुतेः·नाम्नाहितदुपादानंआमनोपायिचोदितेइति· ११ फलंवाक
२१ र्मसंनिधौ·।आग्नेयमष्टाकपालंनिर्वपेद्भूतिकामः·इत्यनारभ्याधीतंतथाग्नेयादीत्यणीयेत्यधिमेधेश्रुतं·नत्रकिंशाकृतेआग्नेयेफलविधिः·काम्येचतेधातवे
कर्मोत्पत्तिरीत्यणीयाकार्यभूतयजमानसंस्कारविधिः·उतोभयत्रकर्मान्तरविधिरितिसंशयः·नदिहपूर्ववत्प्रकरणान्तरग्रहणात्तदेवभेदकं·नामसन्निधानमात्र
मितियोमन्यते·योवाफलरूपोपादेयत्वंमन्यतेशक्यतेहितद्दर्शपौर्णमासस्य·नापिकामयितुंनतुमासादिवद्दशाकासंपादनमिति·तन्निरासायोच्यते·पूर्वत्रापिविप
रीतत्वनिकारणत्वाद्दसंनिधानमेवभेदकं·नचेहाप्यस्तिप्रकरणान्तरंतुकत्विमदपिनव्याप्रियते·फलंतुयद्यपिकामयितुंशक्यतेतथापिस्वरसादेवतत्काम
मुद्दिश्यसाधनमेवोपादेयं·नतुफलं·फलत्वव्याघातात्·विधीयमानंहितदंगमेवस्यात्·एवंसंस्कारेपिद्रष्टव्यं·नचाग्नेयेऽग्निहोत्रवन्नामधेयत्वमस्ति·येनाभे
दाशंकापितावत्स्यात्·यद्यपिवात्रश्रुतिरात्रादिवद्देवयज्यश्रवणांतथापिप्राकयन्यनुमानान्नहिंतांतपदयुक्तवाक्यपरिसमाप्तेर्वाक्यान्तरस्थस्यानपेक्षणात्तक
र्मान्तरत्वं·फलसंस्कार्ययोरिहविचारः·देशनिमित्तेतुपूर्ववदेवोदाहर्तव्ये·दक्षिणेनानीरिणमरस्वत्याः·आग्नेयेनाष्टकपालेनशम्यापराससमीयादितिदेशोदाहरणं·म
चायावग्र्येविश्वजितायजेतेतिनिमित्तस्योदाहरणं १२ संनिधौत्वविभागान्मूलादर्थपुनःश्रुतिः· देशकालनिमित्तफलसंस्कार्याणामसंनिधिघस्तुदाहर
णार्थमिदं·समेदर्शपौर्णमासाभ्यांयजेत·पौर्णमास्यांपौर्णमास्यायजेत·यावज्जीवंदर्शपौर्णमासाभ्यांयजेत·एतयान्नाद्यकामंयाजयेत्·शोभात्विष्टकृतंयजती रम
तिश्रुतं·अत्रापितावद्देशादेः·उद्देशात्कर्मतेयतिपुपादेयंतथाचासाहिविधेयंतेनभिद्यते·एवंगासेरूम·संनिधावविभक्तत्वंकर्मणः·सत्यामिज्जया·गमात्तेनेनतः २१
स्यैतफलाद्यर्थापुनःश्रुतिश्च·निर्देशगतत्वांतंव्यापारंतआत्मकेउद्देशोपादानेप्राप्तिवशेतुविद्यनुवादौ·अतस्तयोस्साम्यांभेदादुपादेयमपिकर्मदेशकाल

योः प्राप्तं तद्रूपमेव प्रत्यभिज्ञायत इत्यनुवाद्यं· तस्य च देशकालसंबंधमात्रमप्राप्तं विधीयत इति न कर्मभेदः न नु देशकालयोर्विधेयत्वादस्त्वेवं· निमित्तफलसंस्कार्याणां तु न विधे
यत्वात् कर्मैव विधेयमतो भिद्येतेति चेत् सत्यं कर्मविधानं यत्र तत्रापि तु न भिद्यते उत्पत्तिविधिभेदं हि भेदो नास्ति च सोऽत्र नः· कर्तव्यतामात्रं ह्युत्पत्तिवाक्यादेवावगतं· तत्र कस्मिन्निमि
त्ते कस्मै वा कामायेति विशेषापेक्षायां उत्पन्नस्यैककर्मणो नैमित्तिकी कर्तव्यता निमित्तवाक्येन प्रतिपाद्यते· तत्र कस्मिन्निमित्ते कस्मै वा कामायेति विशेषापेक्षायां उत्पन्नस्यैव कर्म
णो नैमित्तिकी कर्तव्यता निमित्तवाक्येन प्रतिपाद्यते· फलविनियोगश्च फलवाक्ये· संस्कारविनियोगश्च तद्वाक्ये इत्यकर्मभेदः· आह च· भिन्ने हि विधिसामर्थ्ये उत्पत्तिविनियोगयोः· तत्र
सत्यां गतावेकमप्यत्रानुद्वयं भवेत् इति· १३ आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयेत· दर्शपौर्णमासयोः यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति कालद्वय
युक्तमाग्नेयस्यैकं वचनं· अपरं तु यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवतीत्येककालयुक्तं· तत्र किमुभयत्र विहितादाग्नेयात् कर्मान्तरमिदममावास्यायां विधीयते उत तस्यैवानुवाद इति संशये
अभ्यासात् कर्मान्तरमिति प्राप्ते ब्रूमः· कर्मणः प्रत्यभिज्ञानाद् विभागः प्रतीयते· ऐन्द्राग्नस्य प्रशंसार्थो तस्यैवैषा पुनः श्रुतिः· इन्द्रसहितोऽग्निः समीचीनः तस्मादैन्द्राग्नः कर्तव्यः· आग्नेयस्त्वष्टाक
पालोऽमावास्यायां भवेत्तथैव· नैकैकवलेनाग्निनेह साधुत्वमिति· १४ इति श्रीभाट्टशास्त्रसर्वस्वसंहितायां द्वितीयाध्यायस्य तृतीयः पादः· यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात्। भेदप्र
गात्प्रयोगभेदाभेदचिन्ता· दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति काम्यप्रयोगं विधायाम्नायते· यावज्जीवं दर्शपौर्णमासाभ्यां यजेतेति· तत्र किं काम्यप्रयोग एव यावज्जीविकत्वगुणो विधी
यते उत पुरुषार्थो नियम इति संशयः· तत्र कर्माङ्गविधौ कर्मकथं न्याय यजेतेति· तत्र किं काम्यप्रयोग एव यावज्जीविकत्वगुणो विधीयते उत पुरुषार्थो नियम इति संशयः· तत्र कर्माङ्गविधौ कर्म
कथंभावसंबंधात् प्रकरणानुग्रहः· अतोऽभ्यासविधिः· यावज्जीवकालं यागमभ्यस्येदिति· सिद्धान्तस्तु· यावज्जीवपदे काललक्षणैव प्रसज्यते· यजिनावर्तदभ्यासलक्षणा· प्रक्रियावशात्
न हि प्रकरणवशेन श्रुतेर्लक्षणार्थता न्याय्या· तस्मात् जीवननिमित्ते पुरुषस्य प्रत्यवायपरिहाराय प्रयोगान्तरं विधीयते· १ नामरूपधर्मविशेषपुनरुक्तनिन्दाऽशक्तिसमाप्तिवचनप्रा
यश्चित्तान्यार्थदर्शनाच्छाखान्तरे कर्मभेदः स्यात्· शाखान्तरेषु किमग्निहोत्रादिकर्म भिद्यते किं वा सर्वशाखास्वेकमेवेति संशयः· तत्राविशेषपुनःश्रुतिलक्षणादभ्यासात् प्रकरणान्तराच्च

शा.द्वी. भेदः तथा गुणादपि क्वचिदिदम् ऐन्द्राग्नमेकादशकपालमिति क्वचिदुक्तं अन्यत्र तु द्वादशकपालमिति तत्रावश्यमन्यतरेण कर्मण्युत्पादयितव्ये तद्गतगुणान्योत्पत्तिशिष्टत्वेन रूपान्तर
११ निवेशमलभमानो वाजिनवत्कर्मान्तरं कल्पयतीति चेन्न ब्रूमः विहितस्यापि पुरुषान्तरं प्रति विधानासंभवान्न भेदः यथाग्नेयैकशाखागतमग्निहोत्रादि वाक्यान्तरेणैकपुरुषं प्रति विहि
तमेवापरं प्रति विधत्ते न तु कर्मान्तरम् एवमिहापि अध्येतृभेदाच्छाखान्तरगतसर्वाणि वाक्यान्येकमेव कर्म विदधति एवमसंनिधावपि विप्रकृष्टभावात्कर्मविधानमात्रं सिद्धमिति
न तु भेदः एवमेकादशद्वादशकपालयोरुभयोरप्युत्पत्तिशिष्टत्वान्न बलाबलं न च शाखाद्वयमेकोऽधीते स्वाध्यायोऽध्येतव्य इति विधिनार्थावबोधं प्रति स्वाध्यायस्यो
पादीयमानत्वात्तद्गतैकत्वस्याविवक्षितत्वात् उक्तं च स्वाध्यायग्रहणे नैका शाखा हि परिगृह्यत इति ज्योतिष्टोमादिनामधेयस्य द्रव्यदेवतारूपस्य रूपस्य गुणस्य चाविशे
षेण सर्वशाखासु कर्मण्येकत्वस्याभिज्ञानाच्च उक्तं च सर्वत्र प्रत्यभिज्ञानान्नामसंज्ञारूपगुणादिभिः एककर्मत्वविज्ञानं न शाखास्वपगच्छतीति तदेवं शब्दान्तरादीनि षडपि क
र्मभेदकानि सापवादानि निरूपितानि तत्र संज्ञाशब्दान्तरयोः पर्यायशब्दत्वेनाविशेषेऽपि शब्दान्तरस्य भावनानुरंजकसाध्यभूतधात्वर्थप्रतिपादकत्वेन धात्वर्थावच्छिन्नभावनाप्र
तिपादकतया केवलधात्वर्थप्रतिपादकसंज्ञातो भेदेनाभिधानं संख्यागुणयोस्त्वयं भेदः गुणस्य पूर्वकर्मण्यसंभवाद्भेदकत्वं असंभवस्तूत्पत्तिशिष्टेन बलीयसा विरोधाद्वाक्य
भेदप्रसंगाद्वा संख्यायास्तु भिन्नकर्मसु व्यासज्यसमवायेऽपि भेदमन्तरेणानुपपत्तेर्भेदकत्वमिति उक्तं च स्वरूपानभिधायित्वात्संज्ञाशब्दान्तरात्पृथक् व्यासज्यसमवायाच्च सं
ख्याभिन्ना गुणान्तरादिति सोऽयं शब्दान्तरादिप्रमाणको भेदो व्यक्तेरेव तथाहि विधिनानुष्ठेयस्य भेदोऽवगम्यते तादृशी च व्यक्तिरेवेति आह च यक्तयो हि विधीयन्ते सामान्येनो राम
पलक्षिताः तस्मात्तद्गतमेवेह भेदाभेदनिरूपणमिति एवं च समभिधीयते जात्यादौ पञ्चव्यक्त्यपि ताश्च देशकालयजमानादिभेदेऽपि न भिद्यन्ते दुर्गादिभिरादिवराकारः आह ११
च पौर्णमास्यामपि धामादौ वा स्पष्टा न भिद्यते यजमानान्तरेष्वेव देशभेदेषु वच्छिन्नमिति न च व्यक्तीनां नित्यत्वे तु दृष्टानवैयर्थ्यं अभिव्यक्ताभिरेव ताभिः फलनिष्पत्तेः अथवा ज
ति भेद एव प्रतिपाद्यत इति २ ३ इति श्रीमीमांसाशास्त्रसर्वस्वे द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तश्चाद्वितीयोऽध्यायः ॐ नमो बुद्धये श्रीसिंहसूर्यभगवतोऽस्मि छ